॥ * ॥ अथ वासिष्ठीहवनपद्धतिप्रारम्भः ॥ * ॥

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

लक्ष्मीरमणाय नमः ।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

श्रीगणेशाय नमः ॥ ॥ अथ वासिष्ठीहवनपद्धतिः ॥ ॥ तत्रादौ प्रतिज्ञा ॥ विष्णुर्विष्णुर्विष्णुः ॐ नमः परमात्मनेश्रीपुराणपुरुषोत्तमाय श्रीपरमेश्वराज्ञया अद्यब्रह्मणोद्वितीयपरार्द्धेश्रीश्वेतवाराहकल्पे वैवस्वतमन्वंतरे अष्टाविंशतितमे कलियुगे प्रथमचरणे जंबूद्वीपे भरतवर्षे भरतखण्डे आर्यावर्तांतर्गतब्रह्मावर्तैकदेशे महास्मशाने आनंदवने अविमुक्तवाराणसीक्षेत्रे गौरीमुखे त्रिकंटकविराजिते विक्रमशके बौद्धावतारे वर्तमाने यथानामसंवत्सरे अमुकायने महामांगल्यप्रदे मासोत्तमे अमुकमासे अमुकपक्षे अमुकवासरे अमुकर्क्षे अमुकराशिस्थिते सूर्ये अमुकराशिस्थितेषु चंद्रभौमबुधगुरुशुक्रशनिषु शुभनामयोगे शुभकरणे एवंगुणविशेषणविशिष्टायांशुभपुण्यामुकतिथौ सकलश्रुतिस्मृतिपुराणोक्तफलप्राप्तिकामः अमुकगोत्रोत्पन्नः अमुकशर्माहम् आत्मनः सपुत्रबांधवस्य नवग्रहानुग्रहद्वाराग्रहकृतराजकृतसर्वविधपीडानिवृत्तिपूर्वकनैरुज्यदीर्घायुःपुष्टिधनधान्यसमृद्ध्यर्थं नवग्रहमखेन यक्ष्ये ॥ इतिसंकल्पः ॥ अथवरणम् ॥ पटमंडपादिकरणं तदभावेऽन्येनाच्छादनम् ॥ ततःस्वस्तिवाचनम् ॥ ॐस्वस्ति नऽइन्द्रोवृद्धश्रवाःस्वस्तिनः पूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

स्वस्तिनोबृहस्पतिर्दधातु ॥ १ ॥ पृषदश्वामरुतः पृश्निमातरः शुभंयावानोव्विदथेषुजग्मयः ॥ अग्नि
जिह्वामनवः सूरचक्षसोव्विश्वेनोदेवाऽअवसागमन्निह ॥ २ ॥ भद्रंकर्णेभिः शृणुयामदेवाभद्रंपश्येमा
क्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टुवा ँ सस्तनूभिर्व्यशेमहिदेवहितंयदायुः ॥ ३ ॥ शतमिन्नुशरदो
ऽअन्तिदेवायत्रानश्चक्राजरसंतनूनाम् । पुत्रासोयत्रपितरोभवन्तिमानोमध्यारीरिषतायुर्गन्तोः ॥ ४ ॥
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्मातासपितासपुत्रः ॥ विश्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्जातम
दितिर्जनित्वम् ॥ ५ ॥ दीर्घायुत्वायबलायवर्चसेसुप्रजास्त्वायसहसा ॥ अथोजीवशरदश्शतम् ॥ ६ ॥
ॐद्यौःशान्तिरन्तरिक्ष ँ शांतिः पृथिवीशान्तिरापःशान्तिरोषधयः शान्तिः ॥ वनस्पतयःशान्ति
र्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्व ँ शान्तिःशान्तिरेवशान्तिः सामाशान्तिरेधि सुशान्तिर्भवतु
॥ ७ ॥ इतिस्वस्तिवाचनम् ॥ ॥ अथपुण्याहवाचनम् ॥ ॥ तत्रादौब्राह्मणकरे । शिवाआपः
संतु । ब्राह्मणवचनम् । सौमनस्यमस्तु ॥ एवम् अक्षताः पांतु । मांगल्यमस्तु ॥ पुष्पाणि पांतु ।
श्रीरस्तु ॥ तांबूलानिपांतु । ऐश्वर्यमस्तु ॥ दक्षिणाः पांतु । आरोग्यमस्तु ॥ दीर्घायुःशांतिःपुष्टिस्तुष्टिः

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

श्रीर्यशोविद्याविनयोबहुपुत्रंबहुधनंचास्तु । यंकृत्वासर्ववेदयज्ञक्रियारंभाः शोभनाः प्रवर्तंते तमहमों
कारमादिंकृत्वाऋग्यजुःसामाथर्वणाशीर्वचनंबह्वृषिसमनुज्ञातंभवद्भिरनुज्ञातःपुण्यंपुण्याहंवाचयिष्ये ॥
वाच्यतामितिब्राह्मणवचनम्॥ पुनःयजमानोब्रूयात् । व्रतनियमतपस्स्वाध्यायक्रतुदमदानविशिष्टानां
सर्वेषांब्राह्मणानां मनःसमाधीयताम् । ब्राह्मणाः—समाहितमनसः स्मः ॥ यजमानो ब्रूयात् । प्रसी
दन्तुभवंतः । ब्राह्मणाः—प्रसन्नाःस्मः ॥ ततोयजमानः । अवनिकृतजानुमण्डलः कमलमुकुलसदृशमं
जलिंशिरस्याधायदक्षिणेनपाणिनाजलपूर्णंसुवर्णकलशंधारयित्वा भूमौस्थापितेपात्रद्वयेप्रथमपात्रेकिं
चिदुदकंपातयेत् । तत्रब्राह्मणावदेयुः ॐ शांतिरस्तु । पुष्टिरस्तु । वृद्धिरस्तु । ऋद्धिरस्तु । अविघ्न
मस्तु । आयुष्यमस्तु । आरोग्यमस्तु । शिवमस्तु । शिवंकर्मास्तु । कर्मसमृद्धिरस्तु । पुत्रसमृद्धिर
स्तु । वेदसमृद्धिरस्तु । शास्त्रसमृद्धिरस्तु । धनधान्यसमृद्धिरस्तु । इष्टसंपदस्तु । अरिष्टनिरसन
मस्तु । यच्छ्रेयस्तदस्तु । ततःद्वितीयपात्रे पातयेत् । यत्पापमकल्याणंतद्दूरेप्रतिहतमस्तु । पुनः
प्रथमपात्रेपातयेत् । उत्तरोत्तरेकर्मण्यविघ्नमस्तु । उत्तरोत्तरमहरहरभिवृद्धिरस्तु । उत्तरोत्तराःक्रियाः

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

शुभाः शोभनाःसंपद्यंताम् । तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताःप्रीयंताम् । तिथिकरणेसुमुहूर्तेसु नक्षत्रेसुग्रहेसुदैवते प्रीयेताम् । अग्निपुरोगा विश्वेदेवाः प्रीयंताम् । इंद्रपुरोगा मरुद्गणाः प्रीयंताम् । माहेश्वरीपुरोगा मातरः प्रीयंताम् । वसिष्ठपुरोगा ऋषिगणाः प्रीयंताम् । अरुंधतीपुरोगा एकपत्न्यः प्रीयंताम । ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंताम् । विष्णुपुरोगाः सर्वे देवाः प्रीयंताम् । ऋषयश्छंदांस्याचार्या वेदादेवायज्ञाश्च प्रीयंताम् । ब्रह्मचब्राह्मणाश्च प्रीयंताम् । अम्बिकासरस्वत्यौप्रीयेताम् । श्रद्धामेधे प्रीयेताम् । दुर्गापांचाल्यौप्रीयेताम् । भगवतीकात्यायनी प्रीयताम् । भगवतीमाहेश्वरी प्रीयताम् । भगवतीऋद्धिकरी प्रीयताम् । भगवती वृद्धिकरीप्रीयताम् । भगवतीपुष्टिकरी प्रीयताम् । भगवतीतुष्टिकरी प्रीयताम् । भगवन्तौविघ्नविनायकौ प्रीयेताम् । सर्वाःकुलदेवताः प्रीयंताम् । सर्वाग्रामदेवताःप्रीयंताम् । सर्वाइष्टदेवताःप्रीयंताम् । पुनःद्वितीयपात्रे पातयेत् । हताश्चब्रह्मद्विषः । हताश्चपरिपंथिनः । हताश्चविघ्नकर्त्तारः । शत्रवः पराभवंयान्तु । शाम्यन्तुघोराणि । शाम्यन्तुपापानि । शाम्यन्त्वीतयः । पुनःप्रथमपात्रेपातयेत् ।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

शुभानिवर्द्धताम् । शिवाआपःसन्तु । शिवाऋतवःसन्तु । शिवाअग्नयःसन्तु । शिवाआहुतयःसन्तु । शिवावनस्पतयःसन्तु । शिवाअतिथयःसन्तु । अहोरात्रेशिवेस्याताम् । निकामेनिकामेनःपर्जन्यो वर्षतुफलवत्योनओषधयःपच्यंताम् । योगक्षेमो नः कल्पताम् । शुक्रांगारकबुधबृहस्पतिशनै श्चरराहुकेतुसोमादित्यरूपाः सर्वे ग्रहाःप्रीयंताम् । भगवान्नारायणः प्रीयताम् । भगवान्पर्जन्यः प्रीयताम् । भगवान्स्वामीमहासेनःप्रीयताम् । पुरोनुवाक्ययायत्पुण्यंतदस्तु । याज्ययाय त्पुण्यं तदस्तु । वषट्कारेणयत्पुण्यंतदस्तु ।प्रातःसूर्योदयेयत्पुण्यंतदस्तु ॥ ततोयजमानःसुवर्णकलशं भूमौनिधायप्रथमपात्रपातितजलेनशिरःसंमृज्य सपरिवारगृहांश्चाभिषेचयेत् ॥ द्वितीयपात्रजलमेकां तेपातयेत् । यजमानोब्रूयात । ब्राह्मंपुण्यमहर्यच्चसृष्टयुत्पादनकारकम् । वेदवृक्षोद्भवंपुण्यं तत्पुण्या हंब्रुवंतु नः । भोब्राह्मणाः ममसपरिवारस्यगृहे पुण्याहं भवंतो ब्रुवंतु ॥ (ब्राह्मणाः) ॐ पुण्याहम् ३ पुनन्तुमादेवजनाःपुनन्तुमनसाधियः । पुनन्तुविश्वाभूतानिजातवेदः पुनीहिमा ॥ (यजमानः) पृथिव्यामुद्धृतायांतुयत्कल्याणंपुराकृतम् । ऋषिभिः सिद्धगंधर्वैस्तत्कल्याणंब्रुवंतु नः । भोब्राह्मणाः

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

ममसपरिवारस्यगृहे कल्याणं भवंतो ब्रुवंतु । (ब्राह्मणाः) ॐ कल्याणम् ३ यथेमांवाचंकल्याणीमा
वदानिजनेभ्यः । ब्रह्मराजन्याभ्या ५ शूद्रायचार्य्यायचस्वायचारणायच ॥ प्रियोदेवानांदक्षिणायै
दातुरिहभूयासमयंमेकामः समृद्ध्यतामुपमादोनमतु ॥ (यजमानः) सागरस्यचयालक्ष्मीर्महा
लक्ष्म्यादिभिःकृता । संपूर्णासुप्रभावाचतांचऋद्धिंब्रुवंतुनः । भोब्राह्मणाःममसपरिवारस्यगृहेऋद्धिंभवं
तो ब्रुवंतु ॥ (ब्राह्मणाः) ॐ ऋद्ध्यताम् ३ सत्रस्यऋद्धिरस्यगन्मज्योतिरमृताऽअभूम ॥ दिवंपृथि
व्याऽअद्ध्यारुहामाविदामदेवान्त्स्वर्ज्योतिः ॥ (यजमानः) स्वस्त्यस्तुह्यविनाशाख्यानित्यंमंगल
दायिनी । विनायकप्रियानित्यंतांचस्वस्तिंब्रुवंतु नः । भोब्राह्मणाः ममसपरिवारस्यगृहे स्वस्तिंभवं
तोब्रुवंतु ॥ (ब्राह्मणाः) ॐ स्वस्ति ३ स्वस्तिनऽइंद्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्ति
नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ (यजमानः) समुद्रमथनाज्जाताजगदानंदका
रिका ॥ हरिप्रियाचमांगल्यातांश्रियं च ब्रुवंतु नः ॥ भोब्राह्मणाः ममसपरिवारस्यगृहे श्रीरस्त्विति
भवंतो ब्रुवंतु॥(ब्राह्मणाः ॐ अस्तु श्रीः३श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्या

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

त्तम्॥इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण॥ततस्तिलकाशीर्वादः॥अथ दक्षिणादानम्॥ॐअ
द्यपुण्याहवाचनसांगतासिद्ध्यर्थंपुण्याहवाचकेभ्योनानानामगोत्रेभ्योब्राह्मणेभ्यइमां यथाशक्तिहिरण्य
दक्षिणांसंप्रददे ॥ इतिपुण्याहवाचनम् ॥ अथवरणम् ॥ पूर्वमाचार्य्यस्य वरणं पश्चात्सर्वेषां वरणम् ॥
तद्यथा । आचार्य्यप्रतियजमानो ब्रूयात् अस्मिन्नासनेआस्यताम् ॥ आचार्योब्रूयात् आस्ये ॥ ततो
यजमानः नमोस्त्वनन्तायेतिमंत्रेणपादप्रक्षालनंकुर्यात् ॥ नमोस्त्वनंतायसहस्रमूर्तयेसहस्रपादाक्षिशि
रोरुबाहवे॥सहस्रनाम्नेपुरुषायशाश्वतेसहस्रकोटीयुगधारिणेनमः॥ १ ॥ नमोब्रह्मण्यदेवायगोब्राह्मण
हितायच ॥ जगद्धितायकृष्णायगोविन्दायनमोनमः ॥ २ ॥ गंधमाल्यादिभिरभ्यर्च्य ॐ युञ्जन्ति
ब्रध्नमरुषंचरंतंपरितस्थुषः ॥ रोचंतेरोचनादिवि ॥ युंजंत्यस्यकाम्याहरीविपक्षसारथे ॥ शोणाधृष्णू
नृवाहसा ॥ १ ॥ ॐ अद्येत्यादिनवग्रहमखहोमकर्मकर्तुमेभिश्चंदनतांबूलकुण्डलां
गुलीयककमण्डलुवासोभिराचार्यत्वेन अमुकगोत्रममुकशर्माणममुकवेदाध्यायिनं त्वामहंवृणे
इतिवृणुयात् ॥ आचार्यो वृतोस्मि इतिप्रतिवचनं दद्यात् ॥ ॐ व्रतेनदीक्षामाप्नोति

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

दीक्षयाप्नोतिदक्षिणाम् ॥ दक्षिणाश्रद्धामाप्नोति श्रद्धयासत्यमाप्यते ॥ इत्यनेनमंत्रेण कुशस्थैर्जलबिंदुभिर्यजमानमभिषिंचेत् । अथयजमानेनाचार्यप्रार्थना ॥ आचार्यस्तुयथा स्वर्गेशक्रादीनां बृहस्पतिः ॥ तथा त्वं ममयज्ञेस्मिन्नाचार्योभवसुव्रत॥१॥अथ ब्रह्मवरणम्॥ब्रह्माणंप्रति यजमानोब्रूयात् अस्मिन्नासनेआस्यताम् ।(ब्राह्मणः) आस्ये । ततो यजमानः नमोस्त्वनंतायेतिमंत्रेण पादप्रक्षालनंकुर्य्यात् । गंधपुष्पमाल्यादिभिरभ्यर्च्य ॐ अद्येत्यादिनवग्रहमखहोमकर्मणिन्यूनाधि क्यपरिहारार्थमेभिश्चंदनतांबूलकुण्डलांगुलीयककमंडलुवासोभिर्ब्रह्मत्वेनामुकगोत्रममुकशर्माणममुक वेदाध्यायिनं त्वामहं वृणे । (ब्राह्मणः) वृतोस्मि इतिप्रतिवचनम् । (यजमानः) यथाचतु र्मुखोब्रह्मासर्ववेदधरः प्रभुः ॥ तथात्वंममयज्ञेस्मिन्ब्रह्माभवसुरोत्तम ॥ १ ॥ (ब्रह्मा) ॐव्रतेन दीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम् ॥ दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते ॥ इत्यनेनमंत्रे णकुशस्थैर्जलबिन्दुभिर्यजमानमभिषिंचेत् ॥ अथऋत्विग्वरणम् ॥ ऋत्विजंप्रतियजमानोब्रूयात् इदमासनमास्यताम् । (ऋत्विक्)आस्ये । ततो यजमानः नमोस्त्वनंतायेतिमंत्रेण पादप्रक्षालनंकु

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

र्य्यात् । गंधपुष्पमाल्यादिभिरभ्यर्च्य ॐ अद्येत्यादिनवग्रहमखहोमकर्मणिहवनंकर्तुमेभिश्चंदनतां
बूलकुंडलांगुलीयककमण्डलुवासोभिः ऋत्विक्केन अमुकगोत्रममुकशर्माणममुकवेदाध्यायिनंत्वा
महंवृणे । (ऋत्विक्) वृतोस्मि इति प्रतिवचनम् । (यज०) ऋग्वेदःपद्मपत्राक्षोगायत्रःसामदैवतः ॥
अत्रिगोत्रस्तुविप्रेन्द्रऋत्विक्कंमेमखेभव ॥ १ ॥ (ऋत्विजः) ॐव्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिद
क्षिणाम् ॥ दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते ॥ इत्यनेनमंत्रेणकुशस्थैर्जलबिन्दुभिर्यजमा
नमभिषिञ्चेत् । एवमध्वर्युंहोतारंसदस्यमुपद्रष्टारंचवृणुयात् ॥ अथयजमानेनसर्वेषांप्रार्थना ॥ त्वंगुरु
श्चपितामातात्वंप्रभुस्त्वंपरायणम् ॥ त्वत्प्रसादाच्चविप्रर्षेसर्वमेस्यान्मनोगतम् ॥ १ ॥ आपद्विमोक्ष
णार्थायकुर्युर्यज्ञमतंद्रिताः ॥ ऋत्विजः सहिताः शुक्लाः संयताः सुसमाहिताः ॥२॥ आचार्येणचसंयु
क्ताःकुर्युःकर्मयथोदितम् ॥ भगवन्सर्वधर्मज्ञसर्वधर्मभृतांवर ॥३॥ विततेममयज्ञेस्मिन्नुपद्रष्टाभवद्वि
ज ॥ अथरक्षाभिधानंवारक्षाबन्धनम् । तत्रादौश्वेतसर्षपतंडुलपूर्णपुटकमादायरक्षासूत्रंसफलदक्षि
णाकंगृहीत्वामंत्रान्पठित्वासर्षपाक्षतैर्दिग्रक्षांकुर्यात् ॥ ॐ पूर्वेरक्षतुवाराहआग्नेय्यांगरुडध्वजः ॥ द

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

क्षिणेपद्मनाभस्तुनैर्ऋत्यांमधुसूदनः ॥ पश्चिमेचैवगोविंदोवायव्यांतुजनार्दनः ॥ उत्तरेश्रीपतीरक्षेदी
शान्यांहिमहेश्वरः ॥ ऊर्ध्वंरक्षतुधातावोह्यधोऽनंतश्चरक्षतु ॥ अनुक्तमपियत्स्थानंरक्षत्वीशोममाद्रि
धृक् । इतिततोरक्षासूत्रमॐयेनबद्धोबलीराजादानवेन्द्रोमहाबलः । तेनत्वांप्रतिबध्नामिरक्षेमाचलमा
चल । आचार्यस्य यजमानगात्रप्रमाणम् । अन्येषांप्रमाणंन । इति आचार्यादिवरणम्॥अथकलशस्था
पनम् ॥ ॐ भूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री ॥ पृथिवींयच्छपृथिवीन्दृँह
पृथिवींमाहिँसीः ॥ इतिमंत्रेणगंधादिभिःपृथ्वीमभिपूज्यहस्तेनस्पर्शंकुर्यात् ॥ ॐमानस्तोकेतन
येमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान्नुद्रभामिनोव्वधीर्हविष्मन्तः सदमि
त्वाहवामहे॥इतिमंत्रेणकलशेगोमयस्पर्शंकुर्यात् । ॐ धान्यमसिधिनुहिदेवान्प्राणायत्वोदानायत्वा
व्यानायत्वा ॥ दीर्घामनुप्रसितिमायुषेधांदेवोवः सविताहिरण्यपाणिःप्रतिगृभ्णात्वच्छिद्रेणपाणि
नाचक्षुषेत्वामहीनाम्पयोसि ॥ इतिमंत्रेणधान्यराशिंकृत्वा ॥ ॐ आजिघ्रकलशंमह्यात्वाविशन्त्विन्द
वः । पुनरूर्ज्जानिवर्तस्वसानःसहस्रन्धुक्ष्वोरुधारापयस्वतीपुनर्माविशताद्रयिः ॥इतिमंत्रेणकलशस्प

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

शंकुर्य्यात् । ॐ वरुणस्योत्तम्भनमसिव्वरुणस्यस्कम्भसर्जनीस्थोव्वरुणस्यऽऋतसदन्यसिव्वरुण
स्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद । इतिमंत्रेणकलशेजलंदद्यात् । ॐ पवित्रेस्थोव्वैष्ण
व्यौसवितुर्वःप्रसवऽउत्पुनाम्यच्छिद्रेणपवित्रेण सूर्य्यस्यरश्मिभिः ॥ इतिमंत्रेण कलशेपवित्रंदद्या
त् ॥ ॐ अम्बेऽअम्बिकेऽम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकःसुभद्रिकांकाम्पीलवासिनीम्॥
इतिमंत्रेणकलशे पंचपल्लवान्दद्यात् ॥ ॐ प्राणायस्वाहाऽपानायस्वाहाव्यानायस्वाहा ॥ इति मंत्रेण
कलशे तांबूलंदद्यात् ॥ ॐयाःफलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्ता
नोमुञ्चन्त्व ँहसः ॥ इतिमंत्रेणकलशे पूगीफलंनारिकेलंवादद्यात् । ॐहिरण्यगर्भः समवर्तताग्रेभूत
स्यजातःपतिरेकऽआसीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाव्विधेम ॥ इति मंत्रेणकल
शेहिरण्यमन्यद्द्रव्यं वा दद्यात् ॥ ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहासूर्य्योज्योतिर्ज्योतिःसूर्य्यः
स्वाहा॥ अग्निर्वर्च्चोज्योतिर्वर्चःस्वाहा सूर्योवर्च्चोज्योतिर्वर्च्चः स्वाहा ज्योतिः सूर्य्यः सूर्योज्योतिः
स्वाहा ॥ इति मंत्रेणकलशसमीपेपूर्वदिशि एकस्मिन्पात्रेदीपंनिदद्यात् ॥ इति कलशस्वरूपम् ॥

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

अथकलशाधिष्ठातृदेवतानामावाहनम् ॥ ॐ सरितःसागराःशैलास्तीर्थानिजलदानदाः ॥ आया
न्तुयजमानस्यदुरितक्षयकारकाः ॥ इतिमंत्रेणकलशेगंधाक्षतपातः ॥ कलशस्येमुखेविष्णुः कंठे
रुद्राः समाश्रिताः । मूलेतस्यस्थितोब्रह्मामध्येमातृगणः स्मृतः ॥ कुक्षौतुसागरास्सर्वेसप्तद्वीपावसुं
धरा । ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः ॥ अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः ॥ इत्यावाह्य
पूजनं कुर्यात् ॥ तत्रादौ संकल्पः ॥ महामांगल्यप्रदे मासोत्तमेऽमुकमासेऽमुकपक्षेऽमुकतिथौ अमुक
गोत्रस्याऽमुकशर्मणः सपरिवारस्य निखिलकामनावाप्त्यर्थं कर्त्तव्यममुककर्मकर्तुं कलशाधिष्ठातृ
देवतानां पूजनमहं करिष्ये ॥ इति संकल्प्य ॐ कलशाधिष्ठातृदेवताभ्योनमः । इतिमंत्रेणगंधादि
भिः संपूज्य पुष्पांजलिंनिवेद्यनतिंकुर्य्यात् । अथ कलशप्रार्थना ॥ देवदानवसंवादेमथ्यमानेमहो
दधौ । उत्पन्नोसि तदा कुंभविधृतोविष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः
सर्वेत्वयिस्थिताः । त्वयि तिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः ॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वं
च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठंति

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

सर्वेपि येच कामफलप्रदाः । त्वत्प्रसादादिमंयज्ञं कर्तुमीहे जलोद्भव ॥ सान्निध्यंकुरुमे देवप्रसन्नोभवसर्वदा ॥ इति कलशस्थापनम् ॥ अथकलशाग्रेपश्चिमदिशिगणेशाम्बिकयोःपूजनम्— तत्रादौहस्तेगंधाक्षतपुष्पाणिगृहीत्वागणेशावाहनंकुर्य्यात् । ॐ एह्येहिहेरम्बमहेशपुत्रसमस्तविघ्नौघविनाशदक्ष ॥ मांगल्यपूजाप्रथमप्रधानगृहाणपूजांभगवन्नमस्ते ॥ ॐ गणानांत्वागणपति ँ हवामहेप्रियाणान्त्वाप्रियपति ँ हवामहे निधीनान्त्वानिधिपति ँ हवामहेव्वसोमम ॥ आहमजानिगर्भधमात्वमजासिगर्भधम् ॥ आगच्छभगवन्देवस्वस्थानात्परमेश्वर ॥ अहंपूजांकरिष्यामिसदात्वंसंमुखोभव ॥ १ ॥ इत्यावाह्यपूजयेत् । एतत्पाद्यंगणपतये नमः । एषोर्घोगणपतयेनमः । एतत्स्नानीयजलंगणपतयेनमः । इदंगंधंगणपतयेनमः । इमेअक्षताः गणपतयेनमः । इमेवस्त्रयज्ञोपवीतेगणपतयेनमः । इदंपुष्पंगणपतयेनमः । इमेवस्त्रयज्ञोपवीतेगणपतयेनमः । ॐ धूरसिधूर्वधूर्वतंयोस्मान्धूर्वतितंधूर्वयंवयंधूर्वामः ॥ देवानामसिवह्नितम ँ सस्नितमंपप्रितमंजुष्टतमंदेवहूतमम् ॥ इतिमंत्रेणधूपंगणपतयेनमः । ॐ अग्निर्ज्योतिरितिमंत्रेणदीपंगणपतये नमः । नैवेद्यंगणपतयेनमः । आचमनीयंगण

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

पतयेनमः। तांबूलंगणपतयेनमः। फलंदक्षिणांचगणपतयेनमः ॥ अथविशेषार्घः—रक्षरक्षगणाध्य
क्षरक्षत्रैलोक्यरक्षक। भक्तानामभयंकर्तात्राताभवभवार्णवात् ॥ १ ॥ द्वैमातुरकृपासिंधो प्रभोषाण्मा
तुराग्रज ॥ वरदस्त्वंवरंदेहिवांछितंवांछितार्थद ॥ २ ॥ गृहाणार्घमिमंदेवसर्वदेवनमस्कृत ॥ अनेन
फलदानेनफलदस्स्यास्सदामम ॥ ३ ॥ इतिविशेषार्घः ॥ अथ पुष्पांजलिः—मालतीमल्लिकाजाती
शतपत्रादिसंयुतम् ॥ पुष्पांजलिंगृहाणेशतवपादयुगार्पितम् ॥ पुष्पांजलिं दत्त्वा ॐ एतान्यर्च्चनानि
पाद्यार्घस्नानवस्त्रयज्ञोपवीतगंधाक्षतपुष्पधूपदीपनैवेद्याचमनीयताम्बूलफलदक्षिणापुष्पांजल्यंतानिप
रिपूर्णानिभवंतु। अनेनपूजनेनगणपतिः प्रीयताम् ॥ अथ प्रार्थना। विघ्नेश्वरायवरदायसुरप्रियाय
लंबोदरायसकलायजगद्धिताय । नागाननायसुरयज्ञविभूषितायगौरीसुतायगणनाथनमोनमस्ते
इतिप्रार्थना ॥ अथगौरीपूजनम्। ॐ श्रीश्चतेलक्ष्मीश्चपत्न्या वहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्या
त्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण ॥ सर्वमंगलमांगल्येशिवेसर्वार्थसाधिके ॥
शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते ॥ ॐ गौर्यैनमः ॥ इत्यनेनपाद्यादिभिः संपूज्य। कुंकुमंकामदं

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

दिव्यंकामनाकामसंभवम् ॥ कुंकुमेनार्चितेदेविगृहाणपरमेश्वरि ॥ १ ॥ हरिद्रानिर्मितंदेविसौभाग्यं सुखसंपदा । अतस्त्वांपूजयिष्यामिगृहाणपरमेश्वरि ॥ २ ॥ अबीरं च गुलालंचचोवाचंदनमेवच । अबीरेणार्चितादेविततःशांतिंप्रयच्छमे ॥ ३ ॥ सिंदूरंशोभनंरक्तंसौभाग्यंप्रियवर्धनम् । सुखदंमोक्षदं चैवसिंदूरंप्रतिगृह्यताम् ॥ ४ ॥ अक्षताश्चसुरश्रेष्ठकुंकुमाक्ताःसुशोभिताः । मयानिवेदिताभक्त्यागृहाण परमेश्वरि ॥ ५ ॥ माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो ॥ मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्य ताम् ॥ ६ ॥ वनस्पतिरसोत्पन्नःसुगंधाढ्योमनोहरः । आघ्रेयः सर्वदेवानां धूपोयंप्रतिगृह्यताम् ॥ ७ ॥ साज्यंचवर्तिसंयुक्तंवह्निनायोजितंमया ॥ दीपंगृहाणदेवेशित्रैलोक्यतिमिरा पहम् ॥ ८ ॥ शर्करा खण्डखाद्यानिदधिक्षीरघृतानिच ॥ आहारंभक्ष्यभोज्यंचनैवेद्यंप्रतिगृह्यताम् ॥ ९ ॥ गंगाजलंसमानीतंसुवर्णकलशोद्धृतम् ॥ देवेश्याचमनीयंतेप्रीत्यर्थंप्रतिगृह्यताम् ॥ १० ॥ इदंफलंमयादेविस्थापितंपुरतस्तव ॥ तेनमेसुफलावाप्तिर्भवेज्जन्मनिजन्मनि ॥ ११ ॥ हिरण्यगर्भ गर्भस्थंहेमबीजंविभावसोः ॥ अनंतपुण्यफलदमतःशांतिंप्रयच्छमे ॥ १२ ॥ यानिकानिचपापा

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

निजन्मांतरकृतानिच ॥ तानितानिविनश्यंतिप्रदक्षिणपदेपदे ॥१३॥ पुष्पांजलिंनिवेद्यनतिंकुर्यात् । इतिसंक्षेपतोगौरीपूजनम् ॥ अथग्रहाणांस्थापनंपूजनंच-तद्यथा-रक्तपुष्पाक्षतान्गृहीत्वाआवाहयेत्।सप्तम्यांविशाखान्वितायां कलिंगेजातंकश्यपगोत्रंलोहितवर्णंवर्तुलाकृतिमंडलमध्यस्थंप्राङ्मुखंद्विभुजं पद्महस्तंसप्ताश्वरथवाहनं क्षत्रियाधिपतिर्मीश्वराधिदैवतमग्निप्रत्यधिदैवतसहितंसूर्य्यमावाहयामि ॐ भूर्भुवः स्वः भगवन् सूर्य्यइहागच्छइहतिष्ठइमंयज्ञमभिरक्ष इत्यावाह्य ॐ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंच ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ॥ सप्ताश्वः सप्तरज्जुश्चद्विभुजःस्यात्सदारविः ॥ १ ॥ इतिमंत्रेणपाद्यादिभिः सूर्य्यसंपूज्यानेनैवमंत्रेणरक्तपताकादानम् । इतिसूर्य्यपूजनम् ॥ १ ॥ अथचन्द्रावाहनम्—श्वेतपुष्पाक्षतान्गृहीत्वाऽऽवाहयेत् ॐ चतुर्दश्यांकृत्तिकान्वितायांसमुद्रेजातमत्रिगोत्रंश्वेतवर्णंचतुरस्राकृतिमण्डलात्पूर्वदक्षिणदिक्स्थंपश्चिमाभिमुखंदशाश्वरथवाहनं विशांपतिमुमाधिदैवतं जलप्रत्यधिदैवतसहितं चंद्रमावाहयामिॐ भूर्भुवःस्वःचंद्रइहागच्छइहतिष्ठइमंयज्ञमभिरक्ष इ० ॥ ॐइमंदेवेतिमंत्रेणपाद्यादि

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

भिश्चंद्रंसंपूज्यानेनैवमंत्रेणश्वेतपताकादानम् । इतिचंद्रपूजनम् ॥ २ ॥ अथभौमावाहनम्-रक्तपुष्पा
क्षतान्गृहीत्वाआवाहयेत् । दशम्यांपूर्वाषाढान्विता ग्रामवंत्यांजातंभारद्वाजगोत्रंरक्तवर्णंत्रिकोणंमण्डला
द्दक्षिणदिग्विभागस्थंदक्षिणाभिमुखं मेषवाहनं क्षत्रियाधिपतिं स्कंदाधिदैवतंक्षितिप्रत्यधिदैवतसहितं
भौममावाहयामिॐभूर्भुवःस्वःभौमइहाच्छइहतिष्ठइमंयज्ञमभिरक्ष इत्यावाह्य ॐ अग्निर्मूर्द्धेतिमंत्रेणपा
द्यादिभिःभौमंसंपूज्य अनेनैव मंत्रेणरक्तपताकादानम् । इतिभौमपूजनम् ॥३॥ अथबुधावाहनम्-हरि
त्पुष्पाक्षतान्गृहीत्वाआवाहयेत् । द्वादश्यांधनिष्ठान्वितायांमगधदेशेजातमत्रिगोत्रंहरिद्वर्णंबाणाकृतिं
मण्डलात्पूर्वोत्तरस्थमुत्तराभिमुखं शूद्राधिपतिं सिंहावाहनं नारायणाधिदैवतं विष्णुप्रत्यधिदैवत
सहितंबुधमावाहयामि ॐ भूर्भुवःस्वः बुध इहागच्छइहतिष्ठइमंयज्ञमभिरक्ष ० इत्यावाह्यॐ उद्बुध्यस्वा
ग्नेइतिमंत्रेणपाद्यादिभिर्बुधंसंपूज्य अनेनैवमंत्रेण हरित्पताकादानम् । इतिबुधपूजनम् ॥ ४ ॥ अथगु
र्वावाहनं-पीतपुष्पाक्षतान्गृहीत्वाआवाहयेत् । एकादश्यामुत्तराफल्गुनीयुतायांसिंधुदेशेजातमांगिरस
गोत्रंगोरोचनाभं दीर्घचतुष्कोणाकृतिं मंडलादुत्तरस्थितमुत्तराभिमुखं सिंहवाहनंब्रह्माधिदैवतमिंद्रप्रत्य

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

धिदैवतसहितंगुरुमावाहयामि ॐ भूर्भुवःस्वःगुरो इहागच्छइहतिष्ठइमंयज्ञमभिरक्ष इत्यावाह्यॐबृहस्प तेइतिमंत्रेणपाद्यादिभिः गुरुंसंपूज्य अनेनैव मंत्रेणपीतपताकादानम् । इतिगुरुपूजनम् ॥ ५ ॥ अथ शुक्रावाहनं-श्वेतपुष्पाक्षतान्गृहीत्वाऽऽवाहयेत् । नवम्यांपुष्ययुतायांभोजकटेजातं भार्गवगोत्रंशुक्लव र्णपंचकोणंमंडलात्पूर्वदिक्स्थं पूर्वाभिमुखंश्वेताश्ववाहनमिंद्राधिदैवतमिंद्राणीप्रत्यधिदैवतसहितं शुक्र मावाहयामिॐभूर्भुवः स्वःशुक्रइहागच्छ इहतिष्ठ इमंयज्ञमभिरक्षइ० ॐअन्नात्परीतिमंत्रेणपाद्यादिभिः शुक्रंसंपूज्यअनेनैवमंत्रेणश्वेतपताकादानम् ॥ इतिशुक्रपूजनम् ॥ ६ ॥ अथशन्यावाहनम्-बिल्वपत्रा क्षतान्गृहीत्वाआवाहयेत् । अष्टम्यांरेवतीयुतायांसौराष्ट्रेजातंकाश्यपगोत्रंलोहवर्णधनुराकृतिं मण्डला त्पश्चिमस्थंपश्चिमाभिमुखंगृध्रवाहनंसंकरजातिं यमाधिदैवतं प्रजापतिप्रत्यधिदैवतसहितं शनिमा वाहयामिॐभूर्भुवःस्वःशनेइहागच्छइहतिष्ठ इमंयज्ञमभिरक्षइ० ॐशन्नोदेवीतिमंत्रेणपाद्यादिभिःशनिंसं पूज्यानेनैवमंत्रेणकृष्णपताकादानम् । इतिशनिपूजनम् ॥ ७ ॥ अथराहोरावाहनं-कृष्णपुष्पाक्षता न्गृहीत्वाआवाहयेत् । पौर्णमास्यांभरणीयुतायांबर्बरेजातं पैठीनसिगोत्रं कृष्णवर्णशूर्पाकृतिंमण्डला

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

त्पश्चिमदक्षिणदिक्स्थंदक्षिणाभिमुखं शूद्राधिपतिं सिंहावाहनं कालाधिदैवतं सर्पप्रत्यधिदैवत सहितंराहुमावाहयामि ॐ भूर्भुवःस्वः राहोइहागच्छ इहतिष्ठ इमंयज्ञमभिरक्षइत्या० ॐ कया नश्चित्रेतिमंत्रेणपाद्यादिभिः राहुंसंपूज्याऽनेनैवमंत्रेणकृष्णपताकादानम् । इतिराहुपूजनम् ॥ ॥ ८ ॥ अथकेत्वावाहनम्–कृष्णपुष्पाक्षतान्गृहीत्वाआवाहयेत् ॥ अमावास्यायामाश्लेषा न्वितायां जातंजैमिनिगोत्रं धूम्रवर्णध्वजाकृतिं कपोतवाहनमंत्यजाधिपतिंमंडलात्पश्चिमोत्त रस्थं दक्षिणाभिमुखं चित्रगुप्ताधिदैवतंब्रह्मप्रत्यधिदैवतसहितंकेतुमावाहयामि ॐ भूर्भुवःस्वः केतोइहागच्छइहतिष्ठइमंयज्ञमभिरक्षइ० ॐ केतुंकृण्वन्निति मंत्रेणपाद्यादिभिः केतुंसंपूज्यअनेनै वमंत्रेण धूम्रपताकादानम् ॥ इतिकेतुपूजनम ॥ ९ ॥ अथगणेशकलशगौरीशानभागे यक्षेश्वरकलशस्थापनं–तद्यथा–अश्वत्थगौरमृत्तिकापंचरत्नसर्वौषधिफलद्रव्यवस्त्राम्रपल्लवसंयुतं क लशमैशान्यां स्थापयेत् । तत्रपठनीयोमंत्रः–ॐ सूर्यायत्वायुषंनिर्वापयामिॐचंद्रायत्वायुषं निर्वापयामि इति । अनेनैवमंत्रेणकलशमध्येअक्षतगंधपुष्पांतप्रक्षेपः । अनेनैवकलशजलेनयज्ञान्ते

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

यजमानमभिषिंचेत् ॥ इतिनवग्रहपूजनविधिः ॥ अथसर्वतोभद्रमंडलदेवताः पुराणो
क्तरीत्यालिख्यन्ते—त्वंवैचर्तुमुखोब्रह्मा सत्यलोकेपितामहः । आगच्छमंडलेचास्मिन्ममसर्वार्थ
सिद्धये ॥ इ० मध्येब्रह्माणम् १ क्षीरोदार्णवसंभूतलक्ष्मीबंधोनिशाकर । मंडलेस्थापयाम्यत्रसो
मंसर्वार्थसिद्धये ॥ इ० उत्तरेसोमम् २ ईशानीपालकंश्रेष्ठंसर्वलोकभयंकरम् । मंडलेस्थापयामीहई
शानंसर्वसिद्धये ॥ इ० ऐशान्यामीशानम् ३ सर्वलोकाधिकंश्रेष्ठंदेवर्षीणांचपालकम् । पूर्वदिक्पाल
कंदेवराजानंस्थापयाम्यहम् ॥इ० पू०इंद्रम् ४ त्रिपादंमेषवाहंचत्रिशिखंचत्रिलोचनम् । आग्नेय्यां
स्थापयाम्यत्रह्यग्निंपूरुषमुत्तमम् ॥ इत्याग्नेय्यामग्निम् ५ अंतकः सर्वलोकानां धर्मराज इतिश्रुतः ।
अतस्त्वांस्थापयाम्यत्रदक्षिणस्यांस्थिरोभव ॥ इतिद०यमम् ६ नैर्ऋत्यांवसतिर्यस्यघोररूपी
सदाहि यः । नैर्ऋतिंस्थापयाम्यत्रनैर्ऋत्यांमंडलेशुभे ॥ इतिनैर्ऋत्यांनिर्ऋतिम् ७ अपांपतिंपाश
धरंयादसांपतिमुत्तमम् । वरुणंस्थापयाम्यत्रवारुण्यांमंडलेशुभे ॥ इतिपश्चिमे वरुणम् ८ आशु
गंस्पर्शबोधंचगंधवाहंसुशीतलम् । मंडलेस्थापयामीहवायव्यांवायुमुत्तमम् ॥ इतिवायव्यां वायुम् ९

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

धरोध्रुवश्चसोमश्चाप्याशुगश्चनलोनलः । प्रत्यूषश्चप्रभासश्चवस्वष्टकमिहस्थिरम् ॥ वायुसोमयो
र्मध्येवसून् १० त्रिनेत्रायत्रिरूपायत्रिजटायमहात्मने । नमस्कृत्वास्थापयामिमंडलोपरिमध्य
तः ॥ सोमेशानयोर्मध्येरुद्रम् ११ आदित्यंभास्करंचैवप्रभाकरदिवाकरौ । सूर्य्यंग्रहपतिंचैव
ब्रध्नंतेजोहरिद्धरिम् । सप्ताश्वंवेदमूर्तिंचत्रिदैवत्यंक्रमेणच ॥ इत्यादिद्वादशादित्यान्मंडलेस्था
पयाम्यहम् ॥ ईशानेंद्रयोर्मध्येद्वादशादित्यान् १२ अश्विनौदेववैद्यौचसर्गस्थित्यंतकारकौ ।
मंडलेस्थापयित्वातुपूजयामीष्टसिद्धये ॥ इंद्राग्न्योर्मध्येअश्विनौ १३ दैवेकर्मणिपित्र्येचयेमुख्या
स्सर्वदाशुभाः । मंडलेस्थापयामीहसुखानुष्ठानसिद्धये ॥ अग्नियमयोर्मध्येविश्वान्देवान् १४ य
दृच्छयापर्यटंतियक्षराजामहीतले । कौतुकंप्रेक्षितुंचास्मिन्मंडलेसंतुसुस्थिराः ॥ यमनिर्ऋत्योर्मध्ये
यक्षान् १५ अनंतोवासुकिश्चैवकालीयोमणिभद्रकः । शंखश्चशंखपालश्चककर्कोटकधनंजयौ ॥ धृत
राष्ट्रश्चनागेशाः प्रगृह्णंतुममार्चनम् ॥ निर्ऋतिवरुणयोर्मध्येनागान् १६ उर्वशीप्रमुखाःसर्वाः स्ववें

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

श्याःशक्रपूजिताः । गंधर्वैश्चसहायांतुमंडलेस्मिन्सुशोभनाः ॥ वरुणवाय्वोर्मध्येगंधर्वाप्सरसः १७
त्रियंबकंत्रिपुरुषंनीलकंठंसदाशिवम्।मंडलेस्थापयामीहसुखानुष्ठानसिद्धये ॥ ब्रह्मसोमयोर्मध्येरुद्रं
१८ षडाननंचतुर्हस्तंस्कंदंगौरीसुतंशुभम् । इहैवपूजयिष्यामिसर्वकामार्थसिद्धये ॥ रुद्रसोमयोर्मध्ये
स्कंदम् १९ शिवद्वारगतस्त्वंचशिववाहनमुत्तमम् । पार्वत्यांप्रीतिकृन्नित्यमिहागच्छस्थिरोभव ॥ त
त्रैवनंदिनंशूलमहाकालौच २० अदितिर्देवमातात्वंदक्षपुत्रीसुशोभना । मंडलेस्मिन्समागच्छया
वत्पूजास्थिराभव ॥ तत्रैवादितिम् २१ दक्षोसिसर्वकार्येषुमहायज्ञकरप्रियः ॥ ऋषिश्चसर्वदादक्षमंडले
स्मिन्स्थिरोभव॥तत्रैवदक्षम् २२ तामग्निवर्णांतपसाज्वलंतींसर्वदाशुभाम् ॥ भक्तानांवरदांनित्यांदु
र्गामावाहयाम्यहम्॥ब्रह्मेंद्रयोर्मध्ये दुर्गाम् २३ कृष्णायगोपीनाथायचक्रिणेमुरवैरिणे॥नमस्तुभ्यं
जगद्धातर्मंडलेस्मिंस्थिरोभव ॥ तत्रकृष्णम् २४ ब्रह्मान्योर्मध्येस्वधाम् २५ मृत्युरोगानंतकस्यप्रे
ष्यान्प्राणहरान्गणान् । मंडलेस्थापयामीहपूजार्थंलोकनाशकान्॥ब्रह्मयमयोर्मध्येमृत्युरोगान् २६

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

कुंकुमाभंसदानंदंभक्तसंकटनाशनम् । चतुर्बाहुंत्रिनेत्रंचमंडलेस्थापयाम्यहम् ॥ ब्रह्मनिर्ऋतिमध्ये
गणेशम् २७ पावनाःसर्वलोकानांनिमग्नाःशुद्धिकारकाः । सर्वपापहराःश्रेष्ठामंडलेस्थापयाम्यहम् ॥
ब्रह्मवरुणयोर्मध्ये अपः २८ सुगंधिनश्चशैलाद्यामंदमंदवहाः सदा ॥ तानहंस्थापयामीहमरुतोमंड
लेशुभे ॥ ब्रह्मवाय्वोर्मध्येमरुतः २९ पृथिव्याधार्यतेविश्वंदुर्ग्रहंसागरैर्नरैः । अतस्त्वांस्थापयामीह
ब्रह्मणोमंडलेपदे ॥ ब्रह्मणःपादमूलेपृथिवीम् ३० गंगेचयमुनेचैवगोदावरिसरस्वति । नर्मदेसिंधुकावेर्यौ
मंडलेस्थापयाम्यहम् ॥ ब्रह्मणःपादमूलेनदीः ३१ समुद्राःसर्वतोयेषुश्रेष्ठावैहरिवल्लभाः । मंडलेस्थाप
यामीहतान्नदीशान्सुखाप्तये ॥ ब्रह्मणःसमंतात्सप्तसागरान्-क्षारसागरं क्षीरसागरं दधिसा०
घृतसा० इक्षुसा० सुरासा० स्वादूदकसा० ३२ तदुपरिमेरुनाममंत्रेण पूर्वादिदिक्षु इन्द्राणीं स्वाहां
प्रथमां नैर्ऋतिं वारुणीं वायवीं कुबेरप्रियां रुद्राणीम् पूर्वादिदिक्षु वज्रं शक्तिं दंडं खड्गं पाशमंकुशं
गदां त्रिशूलम् ३३ पुनःपूर्वादिदिक्षु गजं मेषं महिषं शैवं मकरं मृगं नरं वृषभं ३४ पुनःपूर्वादिदिक्षु

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

ऐरावतं पुंडरीकं वामनं कुमुदमंजनं पुष्पदंतं सार्वभौमं सुप्रतीकम् ३५ पुनः पूर्वादिचतु
र्दिक्षु गणपतिं सप्तमातरः दुर्गां क्षेत्राधिपतिं पुनः पूर्वाद्यष्टदिक्षु कश्यपमत्रिं भरद्वाजं विश्वामि
त्रं गौतमं जमदग्निं वसिष्ठम् अरुंधतीम् बाह्यपूर्वादिक्रमेण ऐंद्री कौमारीं ब्राह्मीं वाराहीं चामुंडां
वैष्णवीं माहेश्वरीं वैनायकीम् आवाहयामि इति आवाह्य सर्वतोभद्रमंडलदेवताःपाद्यादिभिः
षोडशोपचारैः संपूज्य नतिं कुर्य्यात् ॥ अथ षोडशमातृकास्थापनंपूजनंच–गौरीपद्माशचीमेधा
सावित्रीविजयाजया । देवसेनास्वधास्वाहामातरोलोकमातरः । हृष्टिःपुष्टिस्तथातुष्टिरात्मनः
कुलदेवताः ॥ गणेशेनाधिकाह्येताःवृद्धौपूज्यास्तुषोडश ॥ इतिपाद्यादिभिःसंपूज्यनतिंकुर्य्यात् ॥ अथ
स्थलमातृकाणांस्थापनंपूजनंच-तद्यथा–ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा । वाराहीचतथेंद्रा
णीचांमुण्डाः सप्तमातरः । अथघृतमातृकापूजनम्–कुडचलग्नवसोर्द्धाराःपंचधाराघृतेनतु । कारये
त्सप्तधारावानातिनीचानचोच्छ्रिताः ॥ १ ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधासिद्धिः प्रज्ञासरस्वती । मांगल्येषु

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

प्रपूज्याश्चसप्तैताघृतमातरः ॥ २ ॥ ॐ वसोःपवित्रमसिशतधारंवसोः पवित्रमसिसहस्रधारम् । देव स्त्वासवितापुनातुव्वसोः पवित्रेणशतधारेणसुप्वाकामधुक्षः ॥ ॐ भूर्भुवःस्वः घृतमातृभ्यो० आवाहनादिपंचोपचारैः संपूज्य अनयापूजयाघृतमातरः प्रीयंताम् । अथ इंद्रध्वजपूजनम् । ईशान कोणेस्थापनं तथा चतुष्षष्टिदेव्यावाहनंस्थापनंपूजनंच—पाद्यादिभिःषोडशोपचारैः संपूज्यन तिंकुर्य्यात्—तद्यथा भोदेवताः सायुधाः सपरिवाराः सवाहना इहागच्छत० आवाहिताभ्यश्च तुष्षष्टिदेवताभ्यः पूजिताभ्योनमः । अथतासांनामानि—गजानना १ सिंहमुखी २ गृध्रस्था ३ काकतुंडिका ४ ॥ उग्रग्रीवा ५ हयग्रीवा ६ वाराही ७ शरभानना ८ ॥ उलूकी ९ च शिवाख्या १० च मयूरा ११ विकटानना १२॥ अष्टवक्रा १३ कोटराक्षी १४ कुब्जा १५ विकटलोचना १६॥ शुष्कोदरी १७: ललज्जिह्वा १८ श्वदंष्ट्रा १९ वानरानना २० ॥ ऋक्षाक्षी २१ केक राक्षी २२ च बृहत्तुंडा २३ सुराप्रिया २४ ॥ कपालहस्ता २५ रक्ताक्षी २६ शुकी २७ श्येनी

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

२८ कपोतिका २९ ॥ पाशहस्ता ३० दंडहस्ता ३१ प्रचंडा ३२ चंडविक्रमा ३३ ॥ शिशुघ्नी ३४ पापहंत्री ३५ च काली ३६ रुधिरपायिनी ३७॥ वसाधरा ३८ गर्भभक्षा ३९ शवहस्तां ४० ऽत्रमालिनी ४१ ॥ स्थूलकेशी ४२ बृहत्कुक्षिः ४३ सर्पास्या ४४ प्रेतवाहना ४५ दंदशूककरा ४६ क्रौंची ४७ मृगशीर्षा ४८ वृषानना ४९ ॥ व्यात्तास्या ५० धूमनिःश्वासा ५१ व्योमैकचरणो ५२ ध्वंहक ५३ ॥ तापिनी ५४ शोषिनीदृष्टिः ५५ कोटरी ५६ स्थूलनासिका ५७ ॥ विद्युत्प्रभा ५८ बलाकास्या ५९ मार्जारी ६० कटपूतना ६१ ॥ अट्टाट्टहासा ६२ कामाक्षी ६३ मृगाक्षी मृगलोचना ६४ नामानीमानि योमर्त्यश्चतुःषष्टिं दिने दिने । जपेत्त्रिसंध्यं तस्येह दुष्टबाधा प्रशाम्यति ॥ १ ॥ अथ प्रधानदेवताः आवाहनस्थापनपाद्यादिभिः संपूज्य प्रतिमाया अग्न्युत्तारणं कृत्वा पंचगव्येन शुद्धिः कार्य्या । ततः पंचामृतैः स्नापयित्वा आवाहनप्राणप्रतिष्ठे कार्ये । गंधाक्षतपुष्पधूपदीपनैवेद्याचमनीयतांबूलदक्षिणा

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

भिः पूजयेत् । यद्यदर्पितं तेन कर्मांगदेवताः प्रीयंतां नमम । अथ कुशकंडिकाकरणम्--शुद्धा
यां भूमौ दर्भैःपरिसमूहनं हस्तमात्रपरिमितां चतुरस्रां भूमिं कुशैःपरिसमुह्य तानैशान्यांपरित्य
ज्य गोमयेनोपलिप्य स्रुवमूलेन प्राङ्मुखं प्रादेशमात्रमुत्तरक्रमेण त्रिरुल्लिख्य उल्लेख
नक्रमेणाऽनामिकांगुष्ठाभ्यांमृदमुद्धृत्य ऐशान्यां दिशि स्थापयेत् । ततः उदकेनाभ्युक्षणम् । एतेपं
चभूसंस्काराः यत्रयत्राग्निस्थापनंतत्रतत्रक्रियंते ॥ अथाग्नेः स्थापनम्--वामहस्तानामिकयाभूमिं
स्पृशन्ताम्रादिपात्रेणाहृतमग्निमानीयात्माभिमुखं निदध्यात् ॥ तद्रक्षार्थं किंचिन्नियुज्य आ
नीताग्निपात्रेअक्षतादिप्रक्षेपः ॥ ततोऽग्निप्रदक्षिणीकृत्यपुष्पचंदनतांबूलपूगीफलद्रव्यवस्त्राण्या
दाय अग्नेर्दक्षिणतो वस्त्रास्तरणं कल्पयित्वा ॥ ब्राह्मणं पादप्रक्षालनगंधमाल्यादिभिरभि
पूज्य हस्तेधौतवस्त्रोत्तरीयकमंडलुभूषणादिकं गृहीत्वा ॐ अद्यकर्त्तव्यामुकहवनकर्मणि कृताकृ
तावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिर्द्रव्याक्षतपूगीफलवासोभिर्ब्रह्मत्वेन

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

त्वामहंवृणे इति ब्रह्माणंवृणुयात् । ततो वृतोस्मि । व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम् । दक्षिणाश्रद्धामाप्नोति श्रद्धयासत्यमाप्यते ॥ इति प्रतिवचनमुक्त्वाग्नेर्दक्षिणतःकल्पितासनो परि उपविशेत् । ततःप्रणीतापात्रम्—वारुणकाष्ठमयं द्वादशांगुलोच्चं चतुरंगुलमध्यखातं पद्माकृतिं पुरतो निधाय जलेनापूर्य कुशैराच्छाद्य ब्रह्मणोमुखमवलोक्य अग्नेरुत्तरतःकुशोपरिनिदध्यात् ॥ ततःबर्हिषापरिस्तरणम् ॥ बर्हिर्नाम्नामेकाशीतिदर्भदलानां तथा चतुर्द्धा भागं कृत्वा यथा एकेन दर्भेणशून्यहस्तो नभवति । प्रथमभागमादायआग्नेयादीशानांतम् १ द्वितीयभागमादाय ब्रह्मणोग्निपर्यंतम् २ तृतीयभागमादाय नैर्ऋत्याद्वायव्यान्तम् ३ चतुर्थभागमादायअग्नितः प्रणीतापर्यन्तम् ४ परिस्तरणंकुर्यात् । ततोऽग्नेरुत्तरतःपश्चिमदिशिपवित्रच्छेदनार्थंकुशत्रयं पवित्रकरणार्थंसाग्रमनन्तर्गर्भंकुशपत्रद्वयं प्रोक्षणीपात्रम् आज्यस्थालीचरुस्थालीसंमार्जनकुशाःपंच उपयमनकुशाःसप्त समिधस्तिस्रःप्रादेशमात्राः स्रुवःखादिरः आज्यं

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

षट्पंचाशदुत्तरशतद्वयमुष्टयवच्छिनं तंडुलपूर्णपात्रं दक्षिणावरो वा पवित्रच्छेदनकुशानां पूर्वपूर्व क्रमेणैतान्यासादनीयानि । अथ त्रिभिः पवित्रच्छेदनकुशैर्द्वे पवित्रे छित्त्वा सपवित्रकरेण प्रणीतोदकंत्रिःप्रोक्षणीपात्रेनिधाय प्रोक्षणीपात्रंवामहस्तेधृत्वा दक्षिणहस्तानामिकांगुष्ठाभ्यां पवित्रं गृहीत्वात्रिरुत्पवनम् । ततःप्रोक्षणीपात्रम् आकाशस्थप्रणीतोदकेनापूरयेत् । भूमौपततिचेत्तदा प्रायश्चित्तंगोदानम् । ततःप्रोक्षणीजलेनयथासादितवस्त्वनुरूपंसेचनम् । ततोऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रंनिदध्यात् । आज्यस्थाल्यामाज्यनिर्वापः । चरुपात्रेचरुप्रक्षेपः । आज्याऽधिश्रयणम् । ततोज्वलत्तृणमवदाय आज्यस्योपरिप्रदक्षिणं भ्रामयित्वावह्नौतत्प्रक्षेपः । ततःस्रुवप्रतपनं कृत्वा संमार्जनकुशैःस्रुवसंमार्जनं–मूलेनमूलं मध्येनमध्यम् अग्रेणाग्रम् पुनःप्रतिताप्यस्रुवंदक्षिणतोनिदध्यात् । ततः आज्योत्तारणम् अवेक्षणम् अपद्रव्यनिरसनंच । ततःउपयमनकुशानादाय वामहस्तेधृत्वा अग्निपर्युक्षणंकृत्वा उत्तिष्ठन्मनसाप्रजापतिंध्यात्वातूष्णीमग्नौघृताक्ताःसमिधस्तिस्रः क्षि

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

पेत् । उपविश्यसपवित्रप्रोक्षण्युदकेनाग्निं पर्युक्ष्य पवित्रे प्रणीतापात्रेनिधाय पातितदक्षिणजानुः
कुशेनब्रह्मणान्वारब्धःसमिद्धतमेग्नौस्रुवेणाज्याहुतिंजुहोति । तत्राघारादारभ्य द्वादशाहुतिषुप्रत्या
हुत्यनंतरंस्रुवस्थितशेषघृतस्य प्रोक्षणीपात्रेप्रक्षेपः ॥ इतिकुशकण्डिकापद्धतिः ॥ अथसमिद्विधिः ॥
समिदर्कमयीभानोःपालाशीशशिनस्तथा । खादिरीभूमिपुत्रस्य त्वापामार्गीबुधस्यच । गुरोर
श्वत्थजाप्रोक्ताशुक्रस्यौदुम्बरीमता । शमीनां तु शनेःप्रोक्ताराहोर्दूर्वामयीतथा । केतोर्दर्भमयीप्रो
क्तान्येषांपालाशवृक्षजा ॥ १ ॥ आर्कीनाशयतेव्याधिंपालाशीसर्वकामदा । खादिरीत्वर्थलाभायाप
मार्गीष्टप्रदर्शिनी । प्रजालाभायचाश्वत्थीस्वर्गायौदुंबरीभवेत् शमीशमयतेपापंदूर्वादीर्घायुरेवच ।
कुशाःसर्वार्थकामानांपरमंरक्षणंविदुः ॥ २ ॥ यथाबाणप्रहाराणांकवचंवारकंभवेत् । तद्वद्दैवोपघाता
नांशांतिर्भवतिवारिका ॥ यथासमुत्थितंयंत्रंयंत्रेणप्रतिहन्यते । तथासमुत्थितंघोरंशीघ्रं शांत्याप्र
शाम्यति ॥ ३ ॥ अथाग्न्यावाहनम्—ततःकुण्डमध्ये ॐ रं इतिवह्निबीजं लिखेत् उत्पत्तिमुद्रांकृत्वावा

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

हयेदग्निपूरुषं-रुद्रतेजस्समुद्भूतंद्विमूर्धानंद्विनासिकम् । स्रुचंस्रुवंचशक्तिंचाप्यक्षमालांचदक्षिणैः ॥
तोमरंव्यजनंचैवघृतपात्रंतुवामकैः । बिभ्रतंसप्तभिर्हस्तैर्द्विमुखंसप्तजिह्वकम् ॥ दक्षिणंचचतुर्जिह्वंत्रि
जिह्वंचोत्तरंमुखम् । कोटिद्वादशमूर्त्याख्यंद्विपंचाशत्कलायुतम् । स्वाहास्वधावषट्कारैरंकितंमेष
वाहनम् । रक्तमाल्यांबरंरक्तंरक्तपद्मासनस्थितम् । रौद्रंवागीश्वरीरूपंवह्निमावाहयाम्यहम् ॥ त्वंमुखं
सर्वदेवानांसप्तार्चिरमितद्युते । आगच्छभगवन्नग्नेयज्ञेस्मिन्सन्निधौभव ॥ अग्नेवैश्वानरइहागच्छइह
तिष्ठइत्यावाह्यपंचोपचारैः पूजयेत् । ततः अग्नेः सप्तजिह्वानांपूजा । कनकायैनमः रक्तायैन॰कृष्णा
यैन॰ उद्गारिण्यैन॰ उत्तरमुखेसुप्रभायैनमःबहुरूपायैनमःअतिरिक्तायैनमः । तदनंतरंस्रुवसमिद्धन
स्पतीनांपूजनंचेति ॥ ॐ अद्येत्यादिअमुकगोत्रोमुकनामाहंसकुटुंबस्यसपरिवारस्यात्मनः सर्वा
भीष्टफलप्राप्त्यर्थममुकयज्ञकर्मणा श्रीसूर्य्यादिनवग्रहादीनां साधिदेवताप्रत्यधिदेवतानां दशदि
क्पालानामुकप्रधानदेवतासहितानांचप्रीतये ब्राह्मणद्वाराः यवतिलधान्याज्यशर्करादिद्रव्यैस्त

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

त्तद्देवतामंत्रैर्यक्ष्ये ततोमनसाव्याहृतिभिराहुतीर्दद्यात् ॥ अथहोमः ॥ ॐ प्रजापतयेस्वाहा । इदंप्रजा
पतये न मम । ॐइंद्रायस्वा० । इदमिंद्राय० । ॐ अग्नयेस्वा० । इदमग्नये० । ॐ सोमायस्वा० । इदं
सोमाय० । ॐभूःस्वा० । इदमग्नये० । ॐ भुवःस्वा० । इदंवायवे० । ॐस्वःस्वा० । इदंसूर्य्याय० ।
एतामहाव्याहृतयः ॥ यथाबाणप्रहाराणांकवचंवारकंभवेत् । तद्वद्दैवोपघातानांशांतिर्भवतिवारिका॥
शांतिरस्तु पुष्टिरस्तु वृद्धिरस्तु यत्पापंतत्प्रतिहतमस्तु । द्विपदेचतुष्पदेसुशांतिर्भवतु ॥ इतिप्रा
यश्चित्तहोमः ॥ अथपंचवारुणीहोमः ॥ ॐत्वन्नो अग्नेव्वरुणस्यव्विद्वान्देवस्यहेडोअवयासिसीष्ठाः ।
यजिष्ठोव्वह्नितमः शोशुचानोव्विश्वाद्वेषाᳬसिप्रमुमुग्ध्यस्मत्स्वाहा । इदमग्नीवरुणाभ्यां० । ॐ
सत्वन्नोऽअग्नेव्वमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ । अवयक्ष्वनोव्वरुणᳬरराणोव्वीहिमृडीकᳬ
सुहवोन एधिस्वा० । इदमग्नीवरुणाभ्यां० । ॐअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्वमयाऽअसि ।
अयानोयज्ञंवहास्ययानोधेहिभेषजᳬस्वाहा । इदमग्नये० । ॐयेतेशतंवरुणयेसहस्रंयज्ञियाःपाशावि

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

तताम्हान्तः । तेभिर्नोऽअद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतः स्वर्काःस्वाहा । इदंवरुणायसवित्रेविष्ण
वेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यश्च० । ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय । अथा
वयमादित्यव्रतेतवानागसोऽअदितयेस्यामस्वाहा । इदंवरुणायादित्यायादितये० । अत्रोदकस्पर्शः।
इतिपंचवारुणीहोमः । अथनवग्रहाणांहोमः । तत्रादौनवग्रहाणांसमिधः । अर्कःपलाशःखदि
रोह्यपामार्गोथपिप्पलः । औदुंबरःशमीदूर्वाःकुशाश्चसमिधःक्रमात् ॥ ततोघृताक्ताः समिधोजुहुयात्।
ॐआकृष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानि
पश्यन्स्वाहा । इदंसू० । ॐइमंदेवाऽअसपत्नꣳसुवध्वंमहतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानराज्याये
न्द्रस्येंद्रियायइमममुष्यपुत्रममुष्यैपुत्रमस्यैविशएषवोमीराजासोमोऽस्माकंब्राह्मणानाꣳ राजास्वाहा ।
इदंचंद्रा० । ॐअग्निर्मूर्द्धादिवःककुत्पतिःपृथिव्याऽअयम् । अपाꣳरेताꣳसिजिन्वतिस्वाहा । इदंमंग
ला० । ॐ उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेसꣳसृजेथामयञ्च।अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्वि

४

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

श्वेदेवायजमानश्चसीदतस्वाहा । इदंबुधाय० । ॐ बृहस्पतेऽअतियदर्योअर्हाद्युमद्विभातिक्रतुमज्जने
षु । यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणंधेहिचित्रꣳस्वाहा । इदंबृहस्पतये० । ॐअन्नात्परिस्रु
तोरसम्ब्रह्मणाव्यपिबत्क्षत्रम्पयः । सोमम्प्रजापतिः ऋतेनसत्यमिन्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्ये
न्द्रियमिदम्पयोमृतम्मधुस्वाहा इदंशुक्राय० । ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभि
स्रवन्तुनःस्वाहा । इदंशनैश्चराय० । ॐकयानश्चित्रऽआभुवदूतीसदावृधःसखा । कयाशचिष्ठयावृता
स्वा० । इदंराहवे० । ॐ केतुंकृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे । समुषद्भिरजायथास्वाहा । इदंकेतवे
इतिनवग्रहाणांहोमः ॥ अथनवग्रहाऽधिदेवतानांहोमः ॐ त्र्यम्बकंयजामहेसुगंधिम्पुष्टिवर्धनम् ।
उर्व्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात्स्वाहा । इदंत्र्यंबकाय० । ॐ श्रीश्चतेलक्ष्मीश्चपत्न्याव्वहो
रात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाणस्वाहा । इदमु
मायै० । ॐ यदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीषात् । श्येनस्यपक्षाहरिणस्यबाहूऽ

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

उपस्तुत्यम्महिजातन्तेअर्वन्स्वाहा । इदंस्कन्दाय० । ॐ विष्णोरराटमसिविष्णोःश्नप्त्रेस्थो
व्विष्णोःस्यूरसिव्विष्णोर्ध्रुवोसि । वैष्णवमसिविष्णवेत्वास्वाहा । इदं विष्णवे० । ॐ ब्रह्मजज्ञानम्प्र
थमम्पुरस्ताद्विसीमतःसुरुचोव्वेनआवः । सबुध्न्याऽउपमाऽअस्यव्विष्ठाःसतश्चयोनिमसतश्चव्विवः
स्वाहा । इदंब्रह्मणे० । ॐ त्रातारमिन्द्रमवितारमिन्द्र ँ हवेहवेसुहव ँ शूरमिंद्रम् । ह्वयामिशक्र
म्पुरुहूतमिन्द्र ँ स्वस्तिनोमघवाधात्विन्द्रःस्वाहा । इदमिन्द्राय० । ॐ असियमोऽअस्यादित्योऽ
अर्वन्नसित्रितोगुह्येनव्रतेन । असिसोमेनसमयाविपृक्तऽआहुस्तेत्रीणिदिविबन्धनानिस्वाहा । इदं
यमाय० । अत्रोदकस्पर्शः । ॐ कार्षिरसिसमुद्रस्यत्वाक्षित्याऽउन्नयामि । समापोऽअद्भिरग्मतसमो
षधीभिरोषधीः स्वाहा । इदंकालाय० । अत्राप्युदकस्पर्शः । ॐ इन्धानास्त्वाशत ँ हिमाद्युमन्त ँ
समिधीमहि । वयस्वन्तोव्वयस्कृत ँ सहस्वन्तःसहस्कृतम् । अग्नेसपत्नदम्भनमदब्धासोऽअदा
भ्यंचित्रावसोस्वस्तितेपारमशीयस्वाहा । इदंचित्रगुप्ताय० ॥ इति नवग्रहाऽधिदेवतानां होमः ॥

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

अथ नवग्रहप्रत्यधिदेवतानांहोमः ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे । देवाँऽआसादयादिहस्वा
हा । इदमग्नये० । ॐ अप्स्वन्तरमृतमप्सुभेषजमपामुतप्रशस्तिष्वश्वाभवतव्वाजिनः । देवीरापोयो
वऊर्म्मिःप्रतूर्तिःकुकुभ्नान्वाजसास्तेनायंवाय ँसेत् स्वादा । इदमद्भ्यः० । ॐ स्योनापृथिविनो
भवानृक्षरानिवेशनी । यच्छानःशर्मसप्रथाः स्वाहा । इदंपृथिव्यै० ॐ इदंविष्णुर्विचक्रमेत्रेधानिद
धेपदम् । समूढमस्यपाँ सुरेस्वाहा । इदंविष्णवे०। ॐ सजोषाऽइन्द्रसगणोमरुद्भिःसोमम्पिबवृत्रहा
शूरविद्वान् । जहिशत्रूँरपमृधोनुदस्वाथाभयङ्कृणुहिविश्वतोनःस्वाहा । इदमिन्द्राय० । ॐ अदित्यै
रास्नासीन्द्राण्याउष्णीषःपूषासिधर्मायदीष्वास्वाहा । इदमिन्द्राण्यै० ॐप्रजापतेनत्वदेतान्यन्यो
विश्वारूपाणिपरिताबभूव । यत्कामास्तेजुहुमस्तन्नोऽअस्तुव्वय ँस्यामपतयोरयीणाँ स्वाहा ।
इदंप्रजापतये० । ॐ नमोस्तुसर्प्पेभ्योयेकेचपृथिवीमनु । येऽअन्तरिक्षेयेदिवितेभ्यःसर्प्पेभ्योनमः
स्वाहा । इदंसर्प्पेभ्यः० । ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोव्वेनआवः।सबुध्न्याऽउपमाऽ

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

अस्यव्विष्ठाः सतश्चयोनिमसतश्चव्विवःस्वा० इदंब्रह्मणे० । इतिनवग्रहप्रत्यधिदेवतानांहोमः ॥ अ
थपंचलोकपालानांहोमः ॥ ॐ गणानान्त्वागणपतिꣳहवामहेप्रियाणान्त्वाप्रियपतिꣳ हवामहे
निधीनान्त्वानिधिपतिꣳ हवामहेव्वसोमम । आहमजानिगर्भधमात्वमजासिगर्भधंस्वाहा । इदंगणपत
ये० । ॐ अम्बेअम्बिकेऽम्बालिकेनमानयतिकश्चनससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनींस्वाहा ।
इदंदुर्गायै० । ॐवातोधामनोवागन्धर्त्राःसप्तविꣳ शतिःतेऽअग्रेश्वमयुॐस्तेअस्मिञ्जवमादधुःस्वाहा ।
इदंवायवे० । ॐऊद्धाऽस्यसमिधोभवन्त्यूद्धाशुक्राशोचीꣳष्यग्नेः । द्युमत्तमासुप्रतीकस्यसूनोःस्वा० ।
इदमाकाशाय० । ॐ अश्विनोर्भैषज्येनतेजसेब्रह्मवर्चसायाभिषिञ्चामिसरस्वत्यैभैषज्येनवीर्याया
न्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेभिषिञ्चामिस्वाहा । इदमश्विभ्यां० ॥ इतिपंच
लोकपालानांहोमः ॥ अथदशदिक्पालानांहोमः ॥ ॐत्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशू
रमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रःस्वाहा । इदमिन्द्रायन० ॥ ॐअ

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

ग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवेदेवाँऽआसादयादिहस्वाहा इदमग्नये० । ॐ असियमोऽअस्या
दित्योऽअर्वन्नसित्रितोगुह्येनव्रतेन । असिसोमेनसमयविपृक्तऽआहुस्तेत्रीणिदिविबन्धनानिस्वा० । इ
दंयमाय० । ॐ एषतेनिर्ऋतेभागस्तंजुषस्वस्वाहाग्निनेत्रेभ्योदेवेभ्यःपुरःसद्भ्यःस्वाहायमनेत्रेभ्योदेवे
भ्योदक्षिणासद्भ्यःस्वाहाविश्वेदेवनेत्रेभ्योदेवेभ्यः पश्चात्सद्भ्यःस्वाहामित्रावरुणनेत्रेभ्योवामरुनेत्रे
भ्योवादेवेभ्यउत्तरासद्भ्यःस्वाहासोमनेत्रेभ्योदेवेभ्य उपरिसद्भ्योदुवःस्वंतस्तेभ्यः स्वाहा । इदंनिर्ऋ
तये० । ॐइमम्मेव्वरुणश्रुधीहवमद्याचमृडयत्वामवस्युराचकेस्वाहा । इदंवरुणाय० । ॐवायुरग्रेगाय
ज्ञप्रीःसाकंगन्मनसायज्ञंशिवोनियुद्भिः शिवाभिःस्वाहा । इदंवायवे० । ॐकुविदंगयवमन्तोयवंचि
द्यथादांत्यनुपूर्वंवियूय इहेहैषांकृणुहिभोजनानियेबर्हिषोनमउक्तिंयजंतिस्वाहा । इदंकुबेराय० । ॐ
ईशाव्वास्यमिद ँ सर्वं यत्किंचजगत्यांजगत्तेनत्यक्तेनभुंजीथामागृधःकस्यस्विद्धनंस्वाहा । इद
मीशानाय० । अत्रोदकस्पर्शः । ॐ नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु । येअन्तरिक्षेयेदिवितेभ्यः सर्पे

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

भ्योनमःस्वाहा । इदमनंताय० । ॐब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोव्वेनआवः । सबुध्न्या ऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्चव्विवः स्वाहा । इदंब्रह्मणे० । इतिदशदिक्पालानांहोमः ॥ अथप्रधानदेवस्यहोमः ॥ ॐनमोभगवतेवासुदेवायस्वाहा । शांताकारंभुजगशयनंपद्मनाभंसुरेशंविश्वाधारंगगनसदृशंमेघवर्णंशुभांगम् । लक्ष्मीकांतंकमलनयनंयोगिभिर्ध्यानगम्यंवंदेविष्णुंभवभयहरंसर्वलोकैकनाथम् १ ॐनमःशिवाय । ध्यायेन्नित्यंमहेशंरजतगिरिनिभंचारुचंद्रावतंसं रत्नाकल्पोज्ज्वलांगंपरशुमृगवराभीतिहस्तंप्रसन्नम् । पद्मासीनंसमंतात्स्तुतममरगणैर्व्याघ्रकृत्तिंवसानंविश्वाद्यंविश्ववंद्यंनिखिलभयहरंपंचवक्त्रंत्रिनेत्रम् २ तत्रदुर्गोत्सवे ॐ जयंतीमंगलाकालीभद्रकालीकपालिनी । दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते ३ अमुकप्रधानदेवतायै स्वाहा ॥ अथानंतरंव्याहृतिहोमः ॥ ॐ भूःस्वाहा इदमग्नये० ॐ भुवःस्वाहा इदंवायवेनमः ॐ स्वः स्वाहा इदंसूर्याय० इति व्याहृतिहोमः ॥ अथ सर्वतोभद्रमंडलदेवतानांहोमः ॥ गण

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

पतयेस्वाहा० दुर्गायैस्वा० ब्रह्मणे० सोमाय० ईशानाय० इन्द्राय० अग्नये० यमाय० निर्ऋ
तये० वरुणाय० वायवे० ध्रुवाय० अध्वराय० सोमाय० अद्भ्यः० अनिलाय० नलायस्वा
हा प्रत्यूषायस्वाहाप्रभासायस्वाहा अजाय० एकपदे० अहिर्बुध्न्याय० विरूपाक्षाय० रैवता
यस्वाहा रहायस्वा० बहुरूपाय० त्र्यंबकाय० सुरेश्वराय० सवित्रे० जयंताय० पिनाकिने०
रुद्रायस्वा० धात्रेस्वा० मित्रायस्वा० यमाय० रुद्राय० वरुणाय० सूर्य्याय० भगाय० विव
स्वतेस्वा० पूष्णेस्वा० सवित्रेस्वा० त्वष्ट्रे० विष्णवे० अश्विभ्यां० क्रतवे० दक्षाय० वसवे०
सत्यायस्वा० कालायस्वा० कामायस्वा० अध्वराय० रोचनाय० पुरूरवसे० आर्द्रवाय० सो
मपायस्वा० अग्निष्वात्तायस्वा० बर्हिषदे० सुकालाय० एकशृंगाय० शूद्राय० सोमाय०
कश्यपाय० अत्रये० भरद्वाजाय० विश्वामित्राय० गौतमाय० जमदग्नये० वसिष्ठाय०
अनंताय० वासुकये० शेषाय० तक्षकाय० कर्कोटकाय० पद्माय० महापद्माय० शंख

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

पालाय॰ कंबलाय॰ पिशाचेभ्यः॰ गुह्यकेभ्यः॰ सिद्धेभ्यः॰ भूतेभ्यः॰ सर्पेभ्यः॰ विश्वावसवे॰ गंधर्वाय॰ हाहै॰ हूहवे॰ घृताच्यै॰ मेनकायै॰ रंभायै॰ उर्वश्यै॰ तिलोत्तमायै॰ सुकेश्यै॰ मंजुघोषायै॰ रुद्रेभ्यः स्कंदाय॰ नंदीश्वराय॰ शूलाय॰ महादेवाय॰ रुद्रय॰ श्रियै॰ विष्णवे॰ मरुद्गणाय॰ पितृभ्यः॰ रोगाय॰ मृत्यवे॰ वसुभ्यः विघ्नराजाय॰ अद्भ्यः॰ समीराय॰ मारुतायस्वाहा मरुतेस्वा॰ जगत्प्राणाय॰ समीरणाय स्वाहा मातरिश्वने॰ मेदिन्यै॰ गंगायैस्वाहा सरस्वत्यै॰ शरय्वै॰ कौशिक्यै॰ वेत्रवत्यै॰ गोदायै॰ ताप्यै॰ रेवायै॰ पयोदायै॰ कृष्णायै॰ भीमरथ्यै॰ तुंगभद्रायै॰ क्षुद्रनदीभ्यः लवणसमुद्राय॰ इक्षुसमुद्राय॰ सुरासमुद्राय॰ सर्पिःसमुद्राय॰ दधिसमुद्राय॰ क्षीरसमुद्राय॰ जीवनसमुद्राय॰ आदित्याय॰ सोमाय॰ भौमाय॰ बुधाय॰ बृहस्पतये॰ शुक्राय॰ शनैश्चराय॰ राहवे॰ केतवे॰ ब्राह्म्यै॰ माहेश्वर्यै॰कौमार्य्यैवैष्णव्यै॰वाराह्यै॰ इंद्राण्यै॰चामुंडायै॰ वज्रायै॰ शक्तयै॰ दंड़ाय॰

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

पतयेस्वाहा॰ दुर्गायैस्वा॰ ब्रह्मणे॰ सोमाय॰ ईशानाय॰ इन्द्राय॰ अग्नये॰ यमाय॰ निर्ऋ
तये॰ वरुणाय॰ वायवे॰ ध्रुवाय॰ अध्वराय॰ सोमाय॰ अद्भ्यः॰ अनिलाय॰ नलायस्वा
हा प्रत्यूषायस्वाहाप्रभासायस्वाहा अजाय॰ एकपदे॰ अहिर्बुध्न्याय॰ विरूपाक्षाय॰ रैवता
यस्वाहा रहायस्वा॰ बहुरूपाय॰ त्र्यंबकाय॰ सुरेश्वराय॰ सवित्रे॰ जयंताय॰ पिनाकिने॰
रुद्रायस्वा॰ धात्रेस्वा॰ मित्रायस्वा॰ यमाय॰ रुद्राय॰ वरुणाय॰ सूर्य्याय॰ भगाय॰ वि व
स्वतेस्वा॰ पूष्णेस्वा॰ सवित्रेस्वा॰ त्वष्ट्रे॰ विष्णवे॰ अश्विभ्यां॰ क्रतवे॰ दक्षाय॰ वसवे॰
सत्यायस्वा॰ कालायस्वा॰ कामायस्वा॰ अध्वराय॰ रोचनाय॰ पुरूरवसे॰ आर्द्रवाय॰ सो
मपायस्वा॰ अग्निष्वात्तायस्वा॰ बर्हिषदे॰ सुकालाय॰ एकशृंगाय॰ शूद्राय॰ सोमाय॰
कश्यपाय॰ अत्रये॰ भरद्वाजाय॰ विश्वामित्राय॰ गौतमाय॰ जमदग्नये॰ वसिष्ठाय॰
अनंताय॰ वासुकये॰ शेषाय॰ तक्षकाय॰ कर्कोटकाय॰ पद्माय॰ महापद्माय॰ शंख

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

पालाय॰ कंबलाय॰ पिशाचेभ्यः॰ गुह्यकेभ्यः॰ सिद्धेभ्यः॰ भूतेभ्यः॰ सर्पेभ्यः॰ विश्वावसवे॰ गंधर्वाय॰ हाहै॰ हूहै॰ घृताच्यै॰ मेनकायै॰ रंभायै॰ उर्वश्यै॰ तिलोत्तमायै॰ सुकेश्यै॰ मंजुघोषायै॰ रुद्रेभ्यः स्कंदाय॰ नंदीश्वराय॰ शूलाय॰ महादेवाय॰ रुद्रय॰ श्रियै॰ विष्णवे॰ मरुद्गणाय॰ पितृभ्यः॰ रोगाय॰ मृत्यवे॰ वसुभ्यः विघ्नराजाय॰ अद्भ्यः॰ समीराय॰ मारुतायस्वाहा मरुतेस्वा॰ जगत्प्राणाय॰ समीरणाय स्वाहा मातरिश्वने॰ मेदिन्यै॰ गंगायैस्वाहा सरस्वत्यै॰ शरय्वै॰ कौशिक्यै॰ वेत्रवत्यै॰ गोदायै॰ ताप्यै॰ रेवायै॰ पयोदायै॰ कृष्णायै॰ भीमरथ्यै॰ तुंगभद्रायै॰ क्षुद्रनदीभ्यः लवणसमुद्राय॰ इक्षुसमुद्राय॰ सुरासमुद्राय॰ सर्पिःसमुद्राय॰ दधिसमुद्राय॰ क्षीरसमुद्राय॰ जीवनसमुद्राय॰ आदित्याय॰ सोमाय॰ भौमाय॰ बुधाय॰ बृहस्पतये॰ शुक्राय॰ शनैश्चराय॰ राहवे॰ केतवे॰ ब्राह्म्यै॰ माहेश्वर्यै॰कौमार्य्यैवैष्णव्यै॰वाराह्यै॰ इंद्राण्यै॰चामुंडायै॰ वज्रायै॰ शक्तयै॰ दंडाय॰

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

खड्गाय॰ पाशाय॰ अंकुशाय॰ गदायै॰ त्रिशूलाय॰ पद्माय॰ चक्राय॰ श्रीमहाविष्णवे स्वाहा॥अथ
दशदिक्पालादीनांबलिदानं तद्यथा-पूर्वे इंद्रायसांगायसपरिवारायसायुधायसशक्तिकायएतंसदी
पंदधिमाषभक्तबलिंसमर्प्पयामि । भोइंद्रदिशंरक्षबलिंभक्षअस्यसकुटुंबस्ययजमानस्यआयुःकर्ता
क्षेमकर्ता शांतिकर्तातुष्टिकर्ता पुष्टिकर्ता वरदोभव १आग्नेय्याम्अग्नयेसांगायसपरिवारायसायुधाय
सशक्तिकायएतंसदीपंदधिमाषभक्तबलिंसमर्प्पयामि । भोअग्नेदिशंरक्षबलिंभक्षयजमानस्यसहकुटुं
बस्यआयुःकर्ताक्षेमकर्ताशांतिकर्तातुष्टिकर्तापुष्टिकर्तावरदोभव २ दक्षिणेयमायसांगायसपरिवारा
यसायुधायसशक्तिकायएतंसदीपंदधिमाषभक्तबलिंसमर्प्पयामि । भोयमदिशंरक्षबलिंभक्षयजमान
स्यसकुटुम्बस्यआयुःकर्ताक्षेमकर्तातुष्टिकर्तापुष्टिकर्तावरदोभव ३ नैऋत्यां नैर्ऋतयेसांगायसपरिवा
रायसायुधायसशक्तिकायएतंसदीपंदधिमाषभक्तबलिंसमर्प्पयामि । भोनैर्ऋतेदिशंरक्षबलिंभक्षअ
स्ययजमानस्यसकुटुम्बस्य आयुःकर्ता क्षेमकर्ता शांतिकर्ता तुष्टिकर्तापुष्टिकर्तावरदोभव ४ पश्चि

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

मेवरुणायसांगायसपरिवारायसायुधायसशक्तिकायएतंसदीपंदधिमाषभक्तबलिंसमर्पयामि । भो
वरुण दिशंरक्षबलिंभक्ष अस्ययजमानस्यसकुटुम्बस्य आयुःकर्ताक्षेमकर्ताशांतिकर्तातुष्टिकर्ता
पुष्टिकर्ता वरदोभव ५ वायव्यां वायवेसांगायसपरिवाराय सायुधायसशक्तिकायएतंसदीपंदधिमा
षभक्तबलिंसमर्पयामि । भोवायोदिशंरक्षबलिंभक्षअस्ययजमानस्यसकुटुम्बस्य आयुःकर्ता क्षेम
कर्ताशांतिकर्ता तुष्टिकर्ता पुष्टिकर्तावरदोभव ६ उत्तरस्यां कुबेरायसांगायसपरिवारायसायुधा
यसशक्तिकायएतंसदीपंदधिमाषभक्तबलिंसमर्पयामि । भोकुबेरदिशंरक्षबलिंभक्ष अस्ययजमान
स्य सकुटुंबस्य आयुःकर्ता क्षेमकर्ता शांतिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदोभव ७ ऐशान्याम्
ईशानाय सांगाय सपरिवारायसायुधायसशक्तिकाय एतंसदीपंदधिमाषभक्तबलिं समर्पयामि ।
भोईशान दिशंरक्षबलिंभक्षअस्ययजमानस्यसकुटुंबस्य आयुःकर्ता क्षेमकर्ता शांतिकर्ता
तुष्टिकर्ता पुष्टिकर्ता वरदोभव ८ ईशानपूर्वयोर्मध्ये ब्रह्मणेसांगायसपरिवारायसायुधायसश

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

क्तिकायएतंसदीपंदधिमाषभक्तबलिंसमर्पयामि भोब्रह्मन्दिशंरक्षबलिंभक्ष अस्ययजमानस्यस
कुटुंबस्यआयुःकर्ताक्षेमकर्ताशांतिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदोभव ९ निर्ऋतिपश्चिमयोर्म
ध्येअनंतायसांगायसपरिवारायसायुधायसशक्तिकाय एतंसदीपंदधिमाषभक्तबलिंसमर्पयामि । भोअ
नंत दिशंरक्षबलिंभक्ष अस्ययजमानस्यसहकुटुंबस्य आयुःकर्ता क्षेमकर्ता शांति कर्त्ता तुष्टिकर्ता
पुष्टिकर्ता वरदोभव ॥ १० ॥ इति दशदिक्पालबलिः ॥ अथ नवग्रहबलिः—ग्रहेभ्यःसांगेभ्यःसप
रिवारेभ्यः सायुधेभ्यःसशक्तिकेभ्यःएतंसदीपंदधिमाषभक्तबलिंसमर्पयामि । भोग्रहाःदिशोरक्षध्वं
बलिंभक्षध्वम् अस्ययजमानस्यसकुटुंबस्य आयुःकर्तारः शांतिकर्तारः तुष्टिकर्तारः पुष्टिकर्तारः
वरदाभवत ॥ इतिग्रहादिबलिः ॥ दुर्गायै सांगायै सपरिवारायैसायुधायैसशक्तिकायैएतंसदी
पंदधिमाषभक्तबलिंसमर्पयामि । भोदुर्गेदिशंरक्षबलिंभक्षअस्ययजमानस्यसकुटुंबस्यआयुःक
र्त्री क्षेमकर्त्री शांतिकर्त्रीतुष्टिकर्त्रीपुष्टिकर्त्रीवरदाभव इतिदुर्गायै बलिंदद्यात् ॥ अथक्षेत्रपालबलिः—

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

दधिमाषसिंदूरकज्जलदीपद्रव्यसहितं भक्तं पात्रे निधाय क्षेत्रपालायशाकिनीडाकिनीभूतप्रेतवेताल पिशाचसहितायइमंबलिंसमर्पयामि । भोक्षेत्रपालदिशोरक्षबलिंभक्षममयजमानस्यसकुटुंबस्यस परिवारस्य आयुःकर्ता क्षेमकर्ता शांतिकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदोभव १ ततः ॐ भूतायत्वा नारातयेस्वरभिविष्येखंदृꣳ हंतांदुर्य्याःपृथिव्यामुर्वंतरिक्षमन्वेमि पृथिव्यास्त्वानाभौसादयाम्य दित्याऽउपस्थेग्नेहव्यꣳरक्षअनेनक्षेत्रपतिबलिनेतारंप्रतितंडुलान्प्रक्षिपेत् । तदंते स्विष्टकृद्धोमः— ॐ अग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते० ॥ इतिस्विष्टकृतम् ॥ ब्रह्मणेपूर्णपात्रदानम्— अद्येत्यादिकृतस्यास्यसांगतासिद्ध्यर्थमिदंपूर्णपात्रंप्रजापतिदैवतंब्रह्मणेदातुमहमुत्सृजे ॥ ततो ब्रह्मग्रं थिविमोकः ॥ ॐ सुमित्रियानऽआपऽओषधयःसन्तु इति पवित्रकं गृहीत्वा प्रणीताजलेन शिरःसंमृज्य ॥ ॐ दुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टि यंचव्वयंद्विष्मः इति ऐशान्यां प्रणीतां न्युब्जीकुर्यात् । ततोगोदानम् ॥ अथ पूर्णाहुतिसंकल्पः—अद्येत्याद्यमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे मम मनोभिलषितधर्मार्थकामादियथेप्सितायुरारोग्यैश्वर्यपुत्रपशु

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

सखिसुहृत्संबंधिवंध्यादिप्राप्तये ब्राह्मणद्वारामत्कारिते अमुकयज्ञकर्मणि गणपतिगौर्यादिनवग्रहा
द्यधिदेवप्रत्यधिदेवपंचलोकपालदशदिक्पालाद्यावाहितेष्टदेवताप्रीतये च स्वैर्मंत्रैर्घृतिलतंडुला
ज्याहुतिभिःपरिपूर्णतासिद्धयेपूर्णाहुतिहोममहंकरिष्ये यजमानःसपत्नीकः आचार्यस्यदक्षिण
स्कंधंस्पृशन्ताम्बूलपूगफलाक्षतंघृतंवाघृतपूर्णनारिकेलंवास्रुवेकृत्वापूर्णाहुतिंदद्यात् । तद्यथा ॐ
पूर्णादर्विपरापतसुपूर्णापुनरापतवस्नेवव्विक्रीणावहाइषमूर्जं शतक्रतोस्वाहा ॥ इतिपूर्णाहुतिः ॥
अथबर्हिर्होमः ॥ ॐ देवागातुविदोगातुंवित्वागातुमितमनसस्पतइमंदेवयज्ञं स्वाहाव्वातेधाःस्वाहा
इतिबर्हिर्होमः ॥ अथ भस्मवंदनं त्र्यायुषकरणम्—ॐ त्र्यायुषंजमदग्नेः इतिललाटे । कश्यप
स्यत्र्यायुषमितिग्रीवायाम् । यद्देवेषुत्र्यायुषमितिदक्षिणबाहुमूले । तन्नोअस्तुत्र्यायुषमितिहृदि ॥ इति
त्र्यायुषकरणम् ॥ ततःनीराजनं—साज्यंत्रिवर्तिसंयुक्तंवह्निनायोजितंमया । दीपंगृहाणदेवेशत्रैलो
क्यतिमिरापहम् ॥ ततः पुष्पांजलिंगृहीत्वा यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ।
तेहनाकम्महिमानःसचन्तयत्रपूर्वेसाध्याः सन्तिदेवाः १ राजाधिराजायप्रसह्यसाहिने नमोवयंवै

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

श्रवणायकुर्महे । समेकामान्कामकामायमह्यं कामेश्वरोवैश्रवणोददातु । कुबेरायवैश्रवणाय
महाराजायनमः ॥ ॐ स्वस्ति साम्राज्यं भौज्यंस्वाराज्यंवैराज्यंपारमेष्ठ्यंराज्यंमाहाराज्यमाधि
पत्यमयंसमंतपर्यायीस्यात्सार्वभौमःसार्वायुषआन्तादापरार्धात् । पृथिव्यैसमुद्रपर्यंतायाएकरा
डिति ॥ तदप्येषश्लोकोभिगीतो मरुतः परिवेष्टारोमरुत्तस्यावसन्गृहे ॥ तस्मिंश्चदीक्षितेयज्ञेवि
श्वेदेवाः सभासदः ॥ इति । विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् । संबा
हुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः ॥ श्रीभवानीशंकरमहाविष्णवादिपंचायतनदेवताभ्यो
नमः मंत्रपुष्पांजलिंसमर्पयामि । यानिकानिचपापानिजन्मांतरकृतानिच । तानितानिविनश्यंतिप्र
दक्षिणपदे पदे । अपराधसहस्राणिक्रियंतेहर्निशंमया । दासोऽयमितिमांमत्वाक्षमस्वपरमेश्वर । आवा
हनंनजानामिनजानामिविसर्जनम् । पूजांचैवनजानामिक्षम्यतांपरमेश्वर ॥ अन्यथाशरणन्नास्तित्वमे
वशरणं मम । तस्मात्कारुण्यभावेनरक्षत्वंपरमेश्वर ॥ इतिप्रार्थना ॥ अथदक्षिणासंकल्पः—इदंब्रह्मण
इदमाचार्याय इदमृग्वेदमूर्तये यजुर्वेदमूर्तये सामवेदमूर्तये अथर्ववेदमूर्तये हिरण्यान्नभूदानंकांस्यपा

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

त्रंसोमदैवतं ताम्रपात्रं सूर्यदैवतं हिरण्यमग्निदैवतं रजतं पितृदैवतमासनं वनस्पतिदैवतं कमंडलुं वरु
णदैवतं कंकणं वरुणदैवतं मुकुटं प्रजापतिदैवतमुपानहौयमदैवतेतूलिकेशय्याइन्द्रदैवतेगावःषड्ऋत्वि
ग्भ्यस्संप्रददेनमम ॥ यद्दत्तंतेनयज्ञपुरुषःप्रजापतिःप्रीयताम् ॥ ततोभिषेकंकुर्यात्–पत्नीवामतः
रुद्रकलशात्पल्लवोदकैः सकलत्रपुत्रमभिषिंचेत् ॐदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्याम्पूष्णोह
स्ताभ्याम् । सरस्वत्यैवाचोयन्तुर्यन्त्रियेदधामिबृहस्पतेष्ट्वासाम्राज्येनाभिषिञ्चाम्यसौ ॐदेवस्यत्वा
सवितुःप्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् । सरस्वत्यैवाचोयन्तुर्यन्त्रेणाग्नेःसाम्राज्येनाभिषि
ञ्चामि ॐदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ अश्विनोर्भैषज्येनतेजसेब्रह्म
वर्च्चसायाभिषिञ्चामि सरस्वत्यैभैषज्येनवीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्रियै
यशसेऽभिषिञ्चामि ॐ पालाशोभवतितेनब्राह्मणोभिषिञ्चतिब्रह्मवैपलाशोब्रह्मणैवैनमेतदभिषि
ञ्चतियद्देवकल्पाञ्जुहोतिप्राणावै कल्पाऽअमृतमुपवै । प्राणाऽअमृतेनैवैनमेतदभिषिञ्चति सर्व्वेषां
वाऽएषवेदानाꣳरसोयत्सामसर्वेषामेवैनमेतद्वेदानाꣳरसेनाभिषिञ्चतिआपोहिष्ठेतित्रिभिः । गणाधि

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

पोर्कश्चशशीधरासुतोबुधोगुरुर्भार्गवसूर्यनन्दनौ । राहुश्चकेतुश्चपरंनवग्रहाः कुर्वन्तुवः पूर्णमनोरथंस
दा १ उपेन्द्रइन्द्रोवरुणोहुताशनोधर्मोयमोवायुहरीचतुर्भुजः । गन्धर्वयक्षोरगसिद्धचारणाः कुर्वंतुवः
पूर्णमनोरथंसदा २ नलोदधीचिः सगरःपुरूरवाःशाकुंतलेयोभरतोधनंजयः । रामत्रयंवैन्यबलीयुधि
ष्ठिरःकुर्वन्तुवःपूर्णमनोरथंसदा ३ मनुर्मरीचिर्भृगुदक्षनारदाः पराशरोव्यासवसिष्ठभार्गवाः । वाल्मी
किकुंभोद्भवगर्गगौतमाःकुर्वन्तुवःपूर्णमनोरथंसदा ४ रम्भाशचीसत्यवतीचदेवकीगौरीचलक्ष्मीश्च
दितिश्चरुक्मिणी । कूर्मोगजेन्द्रस्सचराधराधराः कुर्वन्तुवःपूर्णमनोरथंसदा ५ गंगाचक्षिप्रायमुनास
रस्वती गोदावरीवित्रवतीचनर्मदा । साचंद्रभागावरुणात्वसीनदीकुर्वन्तुवःपूर्णमनोरथंसदा ६ तुंगंप्र
भासोगुरुचक्रपुष्करं गयाविमुक्ताबदरीवटेश्वरः । केदारपंपासरसी च नैमिषंकुर्वन्तुवः पूर्णमनोरथं
सदा ७ शंखश्चदूर्वासितपत्रचामरंमणिःप्रदीपोवररत्नकांचनम् । सम्पूर्णकुंभः सुहुतोहुताशनःकुर्व
न्तुवः पूर्णमनोरथंसदा ८ प्रयाणकालेयदिवासुमङ्गलेप्रभातकालेचनृपाभिषेचने । धर्मायकामायज
यायभाषितंव्यासेनकुर्यात्तुमनोरथंहितत् ९ इत्यभिषेकः ॥ अथतिलकदानमंत्रः—स्वस्तिनइन्द्रोवृ

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

द्धश्रवाःस्वस्तिनः पूषाविश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वतिनोबृहस्पतिर्दधातु १ मं
त्रार्थाःसफलाःसंतुपूर्णाःसंतुमनोरथाः । शत्रूणांबुद्धिनाशोस्तुमित्राणामुदयोस्तुवः॥२॥ अथाग्निप्रार्थ
ना विसर्जनंच–गच्छत्वंभगवन्नग्नेस्वस्थानेकुंडमध्यतः । हुतमादाय देवेभ्यः शीघ्रंदेहि प्रसीदमे १
ॐगच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर । यत्रब्रह्मादयोदेवास्तत्रगच्छहुताशन ॥ २ ॥ अथनवग्रहा
दीन्विसर्जयेत ॥ अक्षतानादाय–भूमिमध्येगच्छसिद्धगोलोकेत्वंप्रजापते । वरुणत्वं जलेगच्छसाग
रेकलशव्रज १ होमांतेगच्छगणपब्रह्मांडेत्वंपितामह । विष्णोत्वंगच्छवैकुंठेकैलासेत्वंमहेश्वर ॥ २ ॥
लक्ष्मित्वंहिमहाविष्णुंस्वभर्तारमनुव्रज । रवेगच्छकलिंगेत्वंचन्द्रत्वंयमुनातटे ॥ ३ ॥ अवंतींगच्छ
भौमत्वंबुधत्वंमगधेव्रज । सिंधुदेशेजीवगच्छकवेभोजकटेव्रज ४ शनेत्वंगच्छसौराष्ट्रेराहोराठीनकं
व्रज । अवंतींगच्छकेतोत्वंस्वंस्वंस्थानंनवग्रहाः ५ इंद्रामरावतींगच्छतथाग्नेयींचपावक । व्रजसंय
मिनींधर्मनैर्ऋतींव्रजनिर्ऋते ६ वरुणांभोनिधौगच्छसर्वत्रव्रजमारुत । गच्छालकांकुबेरत्वमीशै
शानींदिशंव्रज ७ माहेंद्रेत्वंव्रजागस्त्य ध्रुवत्वंमेरुपर्वते । तथाभवद्भिर्ऋषयोगंतव्यमृषिमंडले ॥ ८ ॥

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

वसवोष्टौतुगंगायांरुद्ररुद्रपुरींव्रज । गंधर्वाः किन्नराः सर्वेस्वंस्वंस्थानंचगच्छत ९ यांतुदेवगणाः सर्वे पूजामादायमामकीम् । इष्टकामप्रसिद्ध्यर्थंपुनरागमनायच १० रूपंदेहिजयंदेहियशोदेहिद्विषोजहि । पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे ॥ ११ ॥ चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच । हूयतेच पुनर्द्वाभ्यांसमेविष्णुःप्रसीदतु १२ यस्यस्मृत्याचनामोक्त्या तपःपूजाक्रियादिषु । न्यूनंसंपूर्णतां यातिसद्योवंदेतमच्युतम् १३ ततोब्राह्मणान्भोजयित्वाकुटुंबजनैःपरिवृतःस्वयंभोजनंकुर्यात् ॥

॥ इति वसिष्ठोक्ता हवनपद्धतिः ॥

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

इदं पुस्तकं क्षेमराज-श्रीकृष्णदास-श्रेष्ठिना मुम्बय्यां (खेतवाडी ७ वीं गली खम्बाटा लैन) स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम् । संवत् १९६९, शके १८३४.

पुस्तक मिलनेका ठिकाना-खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" स्टीम् प्रेस- बम्बई.

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

श्रीवेङ्कटेश्वरीय-क्रय्यपुस्तकोंकी संक्षिप्त-सूची।

नाम.	की रु. आ.
पद्मपुराण सम्पूर्ण ५५००० ग्रन्थ बहुत पुस्तकोंके द्वारा शुद्ध होकर छपा तैयार है	१५-०
हरिवंशपुराण सटीक ...	६-०
साम्बपुराण--इसमें सूर्योपासनाकी सांगोपांग विधि कही गयी है ...	१-८
श्रीवाल्मीकीयरामायण संस्कृत मूल और अत्युत्तम भाषाटीकामाहात्म्य और अनुक्रमणिका सहित मोटा कागज सुंदर अक्षर	१८-०
श्रीवाल्मीकीयरामायण केवलभाषा दो जिल्दोंमें	१०-०
श्रीमद्वाल्मीकीय रामायण तनिश्लोकी रामानुजीभूषण संस्कृत टीकासहित	२०-०
श्रीवाल्मीकीयरामायण रामाभिरामीटीका तथा रफ कागज	९-० ८-०

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

नाम.	की. रु. आ.
श्रीवाल्मीकीयरामायण सुंदरकांड मूल बडा	२–०
अध्यात्मरामायण सटीक चिकना कागज	३–०
तथा रफ कागज	२–८
अध्यात्मरामायण भाषाटीका सहित	४–०
अध्यात्मरामायण मूल (गुटकारेशमी) पाठकरनेको अत्युत्तमहै ...	०–१०

नाम.	की. रु. आ.
अध्यात्मरामायण केवलभाषा सुन्दर जिल्दबँधी	२–०
श्रीमद्भागवत श्रीधरीटीका और टिप्पणी- सह ग्लेज कागज ...	१०–०
तथा रफ कागज	९–०
भारतसार संस्कृत.... ...	१–८
श्रीमद्भागवतसचूर्णिक मोटे अक्षर उत्तम कागजकी (सप्ताहबांचनेमें परमोपयोगी)	७–०

पुस्तक मिलनेका ठिकाना–खेमराज श्रीकृष्णदास "श्रीवेङ्कटेश्वर" स्टीम्, प्रेस--बम्बई

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

नाम.	की. रु. आ.
श्रीवाल्मीकीयरामायण सुंदरकांड मूल बडा	२–०
अध्यात्मरामायण सटीक चिकना कागज	३–०
तथा रफ कागज	२–८
अध्यात्मरामायण भाषाटीका सहित	४–०
अध्यात्मरामायण मूल (गुटकारेशमी) पाठकरनेको अत्युत्तमहै ...	०–१०

नाम.	की. रु. आ.
अध्यात्मरामायण केवलभाषा सुन्दर जिल्दबँधी	२–०
श्रीमद्भागवत श्रीधरीटीका और टिप्पणी- सह ग्लेज कागज ...	१०–०
तथा रफ कागज	९–०
भारतसार संस्कृत.... ...	१–८
श्रीमद्भागवतसचूर्णिक मोटे अक्षर उत्तम कागजकी (सप्ताहबांचनेमें परमोपयोगी)	७–०

पुस्तक मिलनेका ठिकाना–खेमराज श्रीकृष्णदास "श्रीवेङ्कटेश्वर" स्टीम्, प्रेस--बम्बई

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

॥ * ॥ इति वासिष्ठीहवनपद्धतिः समाप्ता ॥ * ॥

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi